अन्वयः–'नाट्यस्य ग्रहणं प्राप्तम्, अहं किं करवाणि? ब्रूहि।' पितामहः एतत् तु वचनं श्रुत्वा प्रत्युवाच– 'अयं प्रयोगस्य महान् समयः प्रत्युपस्थितः। अयं महान् महेन्द्रस्य ध्वजमहः प्रवर्तते। अत्र इदानीम् अयं नाट्यसंज्ञः वेदः प्रयुज्यताम्।' ततः निहतासुरदानवे प्रहृष्टामरसङ्कीर्णे महेन्द्रविजयोत्सवे तस्मिन् ध्वजमहे मया हि पूर्वं आशीर्वचनसंयुता

१. नान्दी कृता मया पूर्वं, माशीर्वचन–पा.।
२. देवंसमता–पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अष्टाङ्गपदसंयुक्ता विचित्रा वेदनिर्मिता नान्दी कृता।।५३-५७।।

अभिनव-भारती

उपनिमन्त्रणं दर्शयति–नाट्यस्येति। ग्रहणमिति। गृहीतं शिक्षितं तावन्नाट्यमित्यर्थः। ग्रहणं तदवलोकनं तत्प्राप्तं प्रेक्षणयोग्यं जातमित्यर्थः। एतत्त्विति। तुशब्द एवकारार्थे। श्रुत्वैव। अत एव प्रत्युपस्थितः अयत्नादेवाऽऽभिमुख्येनोपस्थितो दैवसङ्घटित इत्यर्थ। ध्वजस्येन्द्रार्थस्य महनं पूजनं यत्र स ध्वजमहः। ध्वजमहस्य विशेषणद्वारेण सम्भवं दर्शयति निहतासुरदानव इत्यादिना।

तत्र प्रयोगे क्रमं दर्शयति–पूर्वं कृता मया नान्दीति। नान्द्याख्यं मुख्यं मङ्गलं सकलपूर्वरङ्गाङ्गोपलक्षणमिति केचित्। पूर्वरङ्गाङ्गानां मध्यान्नान्दी केवलाऽपि प्रयोज्येत्येवंपरमेतदित्यन्ये। अस्मदुपाध्यायास्तु–यावद् दैत्यैस्तत्र विघ्नाद्याचरणं न कृतं तावत् पूर्वरङ्गस्य विधिपूर्वकस्य कोऽवकाशः? स हि विघ्नरक्षाकरणेन मण्डपभागनिवेशितदेवतापरितोषहेतुः प्राधान्येन। नान्तरीयकतया च दैत्यपरितोषकारणम्। विघ्नास्तु यदा जातास्ततः प्रभृति पूर्वरङ्गः। तथा चतुर्थेऽध्याये वक्ष्यते–(ना.शा.४-१०) पूर्वरङ्गे कृते मया भगवते शिवभट्टारकाय दर्शित इति–यथा तथा तु यः कुतुपविन्यासादि न (दिः स न) पूर्वरङ्गशब्दवाच्यः। तस्मादिह नान्दीमात्रस्य प्रयोगः। किमर्थाऽसावित्याह–वेदनिर्मिता। तत्राऽऽशिषमाशास्ते इति हि श्रुतिः सर्वकर्मस्वाशीःपूर्वकत्वमाह। यत्ततो नान्दीप्रयोगः, न तु पूर्वरङ्गाङ्गत्वेन।

अष्टौ यान्यङ्गभूतानि पदानि वाक्यं प्रति महावाक्यं वा, तानि सुप्तिङन्तान्यवान्तरवाक्यानि वेत्युभयथा। अत एव विचित्रेत्युक्तम्। तेन–

जितमुडुपतिना नमः सुरेभ्यो द्विजवृषभा निरुपद्रवा भवन्तु।
अवतु च पृथिवीं समृद्धसस्यां प्रतिपच्चन्द्रवपुनरिन्द्रचन्द्रः।।
(रत्ना. १-४)

इत्येषाऽपि भारतीयत्वेन प्रसिद्धा कोहलप्रदर्शिता नान्द्युपपन्ना भवति। अत्र तु पक्षे–

नान्दीपदान्तरेष्वेषु ह्येवमस्त्विति नित्यशः।
वन्देतां सम्यगुक्ताभिर्वाग्भिस्तौ पारिपार्श्विकौ।।
(ना.शा.५-११४)

इति श्लोकेऽन्तरशब्दोऽवान्तरवाक्यविच्छेदवाची द्रष्टव्यः।

विवेचकास्त्वाहुः–अङ्गग्रहणादत्राऽवान्तरवाक्यान्येव तावदुपात्तानि। तत्र चाऽष्टद्वादशसङ्ख्या चतुरस्रत्र्यस्रकालानुसारिपूर्वरङ्गद्वयाभिप्रायेण तत्र।

नान्दीं पदैर्द्वादशभिरष्टभिर्वाप्यलङ्कृताम्।। (ना.शा. ५-१०९)

इत्यत्राऽपिशब्दाच्चतुष्पदत्वं षोडशपदत्वं चतुरस्रगतं लभ्यते। त्र्यस्रगतं च त्रिपदत्वं षट्पदत्वं चेत्येवमल्पमपि तद्भेदेन तिस्रस्तिस्रो नान्द्यः। ततः परमपिभूयस्त्वात्। तेन जितमुडुपतिनेति चतुष्पदेयम्। षोडशपदा तु जयति भुवन-कारणम् इत्यादि।।५३-५७।।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तात्पर्य-दीपिका

भावार्थ–"(भगवन् !) मैंने (भरतमुनि ने) नृत्य-गीत-वाद्यमय नाट्यशास्त्र की शिक्षा-दीक्षा ग्रहण की है। अब मैं क्या करूँ? आप कहें।" यह वचन सुनते ही पितामह ब्रह्मदेव ने प्रत्युत्तर दिया–"यह (दैववश अनायास) प्रयोग का अवसर उपस्थित हुआ है। इस समय देवराज इन्द्र का वैभवशाली ध्वजोत्सव चल रहा है। इसमें आप नाटकों के प्रायोगिक पक्ष को मञ्चस्थ करें।" उस समय असुर और दानवों का संहार हो चुका था। अतः उस ध्वजोत्सव में आनन्दित देवों की भीड़ एकत्र थी, जिस में सर्वप्रथम मैंने मङ्गलाशीर्वचन से प्रचुर नान्दीपाठ किया।।५३-५६।।

व्याख्या–नाट्यस्य ग्रहणं प्राप्तम् इत्यादि पद्य के पूर्वार्ध में निमंत्रण का आकार प्रदर्शित है। **ग्रहणं प्राप्तम्** का अभिप्राय यह है कि अब मञ्चस्थ होनेवाले नाटकों के प्रयोग देखे जा सकते हैं, क्योंकि उसका अभ्यास (रिहर्सल) पूर्ण हो चुका है। **एतत् तु** में 'तु' कार 'एव' के अर्थ में प्रयुक्त है, जो प्रत्युत्तर के अविलम्ब को संकेतित कर रहा है। असुरों के पराजय के बाद देवों के विजय का सूचक देवराज इन्द्र का ध्वज फहराया जानेवाला था। वहां उसके पूजन का अवसर अनायास ही दैववश उपस्थित था, जिसकी ओर ब्रह्मदेव ने संकेत किया है।

नाट्य-प्रयोग के क्रम में सर्वप्रथम नान्दी का विधान है। नान्दी नाट्य-प्रयोग का प्रथम मङ्गलाचरण है। इसके विषय में अनेक मतभेद हैं। कुछ लोग **पूर्वं कृता मया नान्दी** इस चरण में प्रयुक्त 'नान्दी' पद को सम्पूर्ण पूर्वरंग के अंग का उपलक्षण मानते हैं। अन्य लोग यह कहते हैं के नान्दी पूर्वरङ्ग के अनेक अङ्गों में अन्यतम है। अतः पूर्वरङ्ग के अंगों के बीच में सर्वप्रथम केवल नान्दी का प्रयोग करना चाहिए।

अस्मदुपाध्यायास्तु–भरतमुनि के साहित्यगुरु भट्टतौत के अनुसार जब तक दैत्य विघ्न उपस्थित नहीं करते, तब तक पूर्वरंग के विधिपूर्वक अनुष्ठान का प्रसंग ही उपस्थित नहीं होता। नान्दीपाठ विघ्नों से रक्षा करता है, अतः प्रधान रूप से मण्डपभाग में बैठाये गए देवताओं के सन्तोष का कारण होता है। वाधक के रूप में दैत्यों के संतोष का कारण नहीं होता। जब से विघ्न उपस्थित हुए, तबसे पूर्वरंग का विधान किया गया, जिसका वर्णन चतुर्थाध्याय में द्रष्टव्य है। भरतमुनि ने भगवान् शिवभट्टारक के समक्ष पूर्वरंग का अनुष्ठान सम्पन्न किया था। छोटे-छोटे तेल-घी आदि के कसोरों को 'कुतुप' कहते हैं। उनको चाहे जैसे रखना इसे **पूर्वरंग** नहीं कहा जा सकता। अतः भरतमुनि ने सर्वप्रथम नान्दीपाठ किया, जिसमें आशीर्वादात्मक मंगलाचरण किया गयाथा। **वेदनिर्मिता**–क्योंकि वह नान्दी वेदों द्वारा निर्मित थी। जैसा कि श्रुतिवचन है– **तत्राऽऽशिणमाशास्ते**। इस प्रकार वेदमाता प्रत्येक कार्य के पूर्व मंगलाचरण के विधान का आदेश देती है, अतः भरतमुनि ने स्वतंत्र रूप से सर्वप्रथम मात्र नान्दीपाठ किया, पूर्वरंग के अंग के रूप में नही। (१) **अष्टाङ्गपदसंयुक्ता**–वह नान्दी वाक्य के प्रति सुवन्त अथवा तिङन्त आठ पदों से युक्त अथवा महावाक्य के प्रति आठ अवान्तर वाक्यों से युक्त होनी चाहिए। नाम, आख्यान, उपसर्ग, निपात, समास, तद्धित, सन्धि और विभक्ति ये आठ अङ्गस्वरूप नान्दी के पद हैं। इसीलिए उसका अन्य विशेषण **विचित्रा** सार्थक है। भरतमुनि नान्दी की परिभाषा इस प्रकार निर्धारित करते हैं–

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रवर्तते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।।
(ना.शा.५।२४-२५)

सूत्रधार को मध्यम-स्वर का आश्रय लेकर द्वादश-पदा अथवा अष्टपदा नान्दी का पाठ करना चाहिए-

स्थायिवर्णाश्रयोपेतां कलाष्टकविनिर्मिताम् ।
सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः ।
ततः पदैर्द्वादशभिरष्टाभिर्वाऽप्यलङ्कृताम् ।।
(ना.शा.५।१०६-१०७)

पूर्वरंग दो प्रकार का है-चतुरस्र और त्र्यस्र। श्लोक के चरण के विचार से चतुरस्र पूर्वरंग के अन्तर्गत द्वादशपदा, अष्टपदा, चतुष्पदा और षोडशपदा नान्दी का विधान है। त्र्यस्र पूर्वरङ्ग में त्रिपदा और षट्पदा नान्दी समाविष्ट हैं। इस प्रकार नान्दी के छः प्रधान भेद हैं। इससे भी अनेक भेद सम्भव हैं।।५३-५७।।

तदन्तेऽनुकृतिर्बद्धा यथा दैत्याः सुरैर्जिताः ।।५७।।
सम्फेटविद्रवकृता च्छेद्यभेद्याहवात्मिका ।

अन्वयः-तदन्ते यथा सुरैः दैत्याः जिताः, तथा सम्फेटविद्रवकृता च्छेद-भेद्याहवात्मिका अनुकृतिः बद्धा।।५७-५८।।

अभिनव-भारती

तदन्त इति। नान्द्यन्ते परिसमाप्तौ। अनुकृतिरिति नाट्यम् । तत्र च बद्धेति गुणनिका योजिता, न तु प्रयोग इत्येतच्चाऽसत्, तत्पूर्वोत्तरव्याघातात्। पूर्वं ह्युक्तम्-एवं नाट्यमिदमित्यादि नान्दी कृतेत्यन्तम्। वक्ष्यते च-ब्रह्मादयः प्रयोगपरितोषिता इति। तस्माद् बद्धेति प्रस्ताविता, न तु निष्पादिता। प्रस्तावना तावत्प्रयुक्तेत्यर्थः ।

अन्ये त्वनुकृतिरिति नाट्यानुकाररूपा प्रस्तावनेत्याहुः। कृता तदन्तेऽनुकृतिः इति च पठन्ति। एतदुपजीवनेनैव चिरन्तनाः कवयो नान्द्यन्ते सूत्रधारः इति पुस्तके लिखन्ति स्म। किं प्रस्तावितमित्याह-यथा दैत्या इति। डिम-समवका-रेहामृगादीनामन्यतमः प्रयोगः प्रास्तावीत्यर्थः। यद्यपि भरतपुत्रैर्दशरूपकमभ्य-स्तम्, तथापि न युगपत् सर्वः प्रयोक्तुं पार्यत इत्येवमुक्तम्। यत् केचिदचूचुदन्-समवकारे कः कैशिकीयोजनावसर इति पूर्वग्रन्थोऽसङ्गत इति तन्निरवकाश-मेव। समवकारादावपि च सौन्दर्यात्मकं वैचित्र्यं कैशिकीविजृम्भ एवेत्युक्तम्।

रोषग्रथितवाक्यस्तु सम्फेटः। शङ्का-भय-त्रासकृतो विद्रवः। छेदमर्हतीति च्छेद्यः शस्त्राहवः। भेदमर्हतीति भेद्यं मल्लयुद्धात्मकनियुद्धम्।।५७-५८।।

तात्पर्य-दीपिका

भावार्थ-नान्दीपाठ के अन्त में जिस प्रकार देवताओं ने दैत्यों पर विजय प्राप्त की थी, उसका नाट्यरूपान्तरण प्रस्तुत किया गया, उसमें सम्फेट (सम्पूर्ण वाक्य), आशंका और भय से उत्पन्न विद्रव (पलायन), छेद्य-आहव (शस्त्र-युद्ध) और भेद्य-आहव (मल्ल-युद्ध) के अभिनय सम्मिलित थे।।५७-५८।।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

व्याख्या–यहां अनुहति का अर्थ नाट्य है। कुछ लोग बद्धा का अर्थ गुणनिका (रिहर्सल) करते हैं, जो ठीक नहीं है। क्योंकि यह व्याख्यान करने पर वदतो-व्याघात होगा। एवं नाट्यमिदं (१।५१) से प्रारम्भ कर नान्दी कृता मया पूर्वं ह्याशीवचनसंयुता (१।५६) तक और ब्रह्मादयः प्रयोगपरितोषिताः (१।५८) में प्रयोग की योजना की चर्चा की है, गुणनिका की नहीं। अतः बद्धा का अर्थ यह है कि भरतमुनि द्वारा नाट्यप्रयोग के पहले उसकी प्रस्तावना निष्पन्न की गयी। कुछ लोग अनुकृति का अर्थ नाट्य न कर नाट्य की अनुकृतिरूपा प्रस्तावना करते हैं। उनके मत में कृता तदन्तेऽनुकृतिः यह स्वीकृत पाठ है। वे इस पाठ को स्वीकार करते हुए पुस्तक में नान्द्यन्ते सूत्रधारः लिखते थे। प्रस्तावना के अन्तर्गत समवकार, डिम और ईहामृग आदि रूपकों में अन्यतम प्रयोग की सूचना होती थी। समवकार के अन्तर्गत देवासुरसंग्राम का घनघोर वर्णन होता है। ईहामृग के अन्तर्गत अभीष्ट शत्रुवध के अनन्तर किसी बहाने से युद्ध शान्त हो जाता है। डिम के अन्तर्गत शृंगार और हास्य रस वर्णित हैं। यह युद्धप्रधान रूपक है; जिसमें देव, असुर, राक्षस, भूत, यक्ष और नागजाति के पुरुषपात्र होते हैं (द्र.अध्याय २०)। यद्यपि भरतमुनि के पुत्रों ने नाटक आदि दश रूपकों का सैद्धान्तिक और प्रायोगिक अध्ययन किया था, तथापि सभी एक साथ उनका प्रयोग करने में अक्षम थे। कुछ लोग समवकार में कैशिकी वृत्ति के प्रयोग को अप्रासंगिक कहते हैं, जब कि वही लालित्य और चमत्कार की जन्मदात्री है।।५७।।५८।।

ततो ब्रह्मादयो देवाः प्रयोगपरितोषिताः ।।५८।।
प्रददुर्हृष्टमनसः सर्वोपकरणानि नः ।

अन्वयः–ततः ब्रह्मादयः देवाः प्रयोगपरितोषिताः हृष्टमनसः नः सर्वोपकरणानि प्रददुः।।५८।।५९।।

अभिनव-भारती

तत इति। प्रभुपरितोषाय प्रभुचरितं कदाचिन्नाट्यं वर्णनीयमिति यथा दैत्याः सुरैर्जिता इत्येतस्माल्लभ्यत इति केचिदाहुः। तदसत्, दशरूपकलक्षण-युक्तिविरोधात् । तत्र हि किञ्चित् प्रसिद्धचरितं किञ्चिदुत्पाद्यचरितमिति वक्ष्यते। न च वर्तमानचरितानुकारो युक्तः। विनेयानां तत्र रागद्वेषमध्यस्थादिना तन्मयीभावाभावे प्रीतेरभावेन व्युत्पत्तेरप्यभावात्। वर्तमानचरिते च धर्मादि-कर्मफलसम्बन्धस्य प्रत्यक्षत्वेप्रयोगवैयर्थ्यम्। प्र (अप्र) त्यक्षत्वे भविष्यति प्रमाणाभावात् इति न्यायेन व्युत्पत्तेः सम्भवान्नायिका (सम्भावना का) (?) एतच्च दशरूपकाध्याये वितनिष्याम इत्यास्तां तावत्।

देवानां त्वद्य प्रसिद्धवर्णनीयासम्भवात् पूर्वकल्पमन्वन्तरादिगत-देवासुरचरितकीर्तनम्। अनादित्वात् संसारस्य श्रुतिस्मृत्यनुमतदेवासुरकीर्तन-वदिति। तत्र वर्तनो (वर्तमानो) पवर्णनं तज्जातीयानाम्। अथ चरित्रभ्रमविप्र-लब्धास्त्वसुराश्चुक्षुभुरिति वक्ष्यामः। न च स्वचरितवर्णनाद् देवानां परितोष इह। यत आह–प्रयोगपरितोषिता इति।।५८-५९।।

तात्पर्य-दीपिका

भावार्थ–अनन्तर ब्रह्मा आदि देवताओं ने (हमलोगों के) नाट्य-प्रयोग से संतुष्ट

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

होकर प्रसन्नचित्त से हमें सभी उपकरण (सामग्री) प्रदान किए।

व्याख्या—कुछ लोग यथा देत्याः सुरैः जिताः ततः इस प्रकार वाक्ययोजना करते हुए यतः ईश्वर, स्वामी को संतुष्ट करने के लिए देवों द्वारा दानवों पर विजयप्राप्ति का सम्यक् चित्रण नाट्य में किया गया अतः यह अर्थ करते हैं, जो समुचित नहीं है। अन्यथा दशरूपकों की परिभाषाएं परस्पर विरुद्ध होंगी। किसी रूपक में प्रसिद्ध, ख्यातिप्राप्त ऐतिहासिक अथवा पौराणिक चरित्रचित्रण रहता है और किसी रूपक में कल्पित चरित्र चित्रित रहता है। वर्तमान चरित्र का अनुकरण इसलिए योग्य नहीं होता कि जिन्हें नाट्य-प्रयोगों की शिक्षा दी जाती है, उनमें राग, द्वेष, तटस्थता आदि का तन्मयीभाव, साधारणीकरण न होने से उनमें आकर्षण, अनुराग उत्पन्न नहीं होता। फलतः उससे कोई निष्पत्ति भी नहीं होती। साथ ही वर्तमान चरित्र में धर्म-अधर्म का जब प्रत्यक्ष साक्षात्कार सम्भव है, तब उसका नाट्यप्रयोग भी व्यर्थ है। इन सबका वर्णन विस्तार से दशरूपकाध्याय में द्रष्टव्य है।

देवों का प्रसिद्ध वर्णन असंभव होने के कारण पूर्व कल्पों, मन्वन्तरों आदि में घटित देव और असुरों के चरित्र चित्रित होने हैं। संसार अनादि होने के कारण जिस प्रकार वे श्रुतियों, स्मृतियों और पुराणों में चित्रित होते हैं, उसी प्रकार रूपकों में भी उनका मंचन किया जाता है। उस काल में वर्णित जातियों का चित्रण उसमें रहता है। उन्हीं प्रयोगों को देखकर देवता संतुष्ट हुए, अपना चरित्र देख कर नहीं। इसी दृष्टि से प्रयोगपरितोषिताः इस विशेषण का प्रयोग है।।५८।।५९।।

प्रीतस्तु प्रथमं शक्रो दत्तवान् स्वं [1]ध्वजं शुभम् ।।५९।।
ब्रह्मा कुटिल[2]कं चैव भृङ्गारं वरुणः शुभम्[3] ।
सूर्यश्छत्रं शिवः सिद्धिं वायुर्व्यजनमेव च ।।६०।।
विष्णुः सिंहासनं चैव कुबेरो[4] मकुटं[5] तथा ।
श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती ।।६१।।
शेषा ये देवगन्धर्वा यक्षराक्षसपन्नगाः ।
तस्मिन् सदस्यभिप्रेता[6]न् नानाजातिगुणाश्रयान् ।।६२।।
अंशाशैर्भाषितं भावान् रसान् रूपं बलं[8] तथा ।
दत्तवन्तः प्रहृष्टास्ते मत्सुतेभ्यो दिवौकसः[9] ।।६३।।

अन्वयः—प्रथमं शक्रः प्रीतः (सत्) शुभं स्वं ध्वजं दत्तवान्। ब्रह्मा चैव कुटिलकं (दत्तवान्।), वरुणः शुभं भृङ्गारं (दत्तवान्।) सूर्यः छत्रं दत्तवान्। शिवः सिद्धिं दत्तवान्। वायुः व्यजनम् एव च दत्तवान्। विष्णुः सिंहासनं चैव दत्तवान्। तथा

१.स्वध्वजं।
२. कमण्डलुं।
३. तथा
४. कुबेरो, कुबेरो।
५. मुकुटं
६. अतिप्रीतान्, अतिप्रीता।
७. भाषितान्
८. रूपं वलिक्रियाम्, रूपं क्रियावलम्
९. प्रददुर्मत्सुतेभ्यश्च चित्रमाभरणं बहु।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कुबेरः मकुटं दत्तवान्। सरस्वती देवी प्रेक्षणीयस्य श्रात्यत्वं ददौ। तस्मिन् सदसि शेषाः ये देव-गन्धर्वाः यक्ष-राक्षस-पन्नगाः, ते दिवौकसः प्रहृष्टाः (सन्तः) मत्सुतेभ्यः अभिप्रेतान् नानाजातिगुणाश्रयान् भावान् रसान्अंशांशैः भाषितं, रूपं तथा बलं दत्तवन्तः।।५९-६३।।

अभिनव-भारती

ध्वजमिति, यस्य विघ्नशान्त्यै पूजार्थमुपयोगी भावी। कुटिलकमिति। वक्रदण्डो विदूषकोपयोगी, ब्रह्मायुधात्मा दण्डः। अपकामत्वेन भीषणत्वा-वात्यादपीत्यर्थः (?)। भृङ्गारः पारिपार्श्विकोपयोगी। छत्रमत्र वितानः। जलदानां सूर्योद्भवत्वात् तत्प्रतिमः। यदाहुः—ऋतवे वर्षान्ते महतो मेघसम्प्रवानिति। भगवदायत्ता दैवी मानुषी च सिद्धिरिति मध्ये तदुपादानं सर्वव्यापकत्वं दैव्याः सिद्धेः प्रतिपादयितुम्। व्यजनं घर्मापनुत्तये। सिंहासनादि राजभूमिकायामुपयोगि। यक्षादयो ये तत्त्वज्ञा नाट्यस्य। भाषितमिति। तत्तद्भूमिकोपयोगिवाचिके शिक्षा। भावानिति विभावादिषु। तथा हि रक्तमांसादीनि भयजुगुप्साविभावरूपाणि यक्षरक्षसां हर्षोत्साहविभावतां यान्तीति तदुपदेशादेव तज्ज्ञेयम्। रसानिति स्वोचितस्थायिभावसम्बध्यमान-तत्तद्रसोपयोगिनोऽनुभावव्यभिचारिवर्गस्य शिक्षा दर्शिता। रूपमिति मुखरागस्य। बलमित्याङ्गिकस्य। प्रतिभूमिकं परितुष्टेन अन्ततोऽत्र शिष्टा(क्षा) पि काचिद् देया। सामाजिकेभ्यश्च धनविज्ञानमित्याहरणीयातोद्या (द्याद्या) जिहीर्षता च परिषत्परितोषाय यतितव्यमित्येतदनेन दर्शितम्।।५६-६३।।

तात्पर्य-दीपिका

भावार्थ— सर्वप्रथम इन्द्र ने प्रसन्न होकर अपना मङ्गल-ध्वज प्रदान किया। अनन्तर ब्रह्मदेव ने कुटिलक, अपनी टेढ़ी छड़ी प्रदान की। वरुण ने अपना कमण्डलु,सूर्य ने छत्र, शिव ने अपनी सिद्धि, वायु ने पंखा, विष्णु ने सिंहासन, कुबेर ने मुकुट और वाग्देवी सरस्वती ने दृश्यकाव्य को श्रव्य-गुण प्रदान किया। उस सभा में जो देव, गन्धर्व, यक्ष, राक्षस, नाग आदि दिव्ययोनि में अवतीर्ण स्वर्गलोक के अवशिष्ट निवासी थे, उन्होंने मेरे (भरतमुनि के) पुत्रों को अभीष्ट नानाविध जाति के गुणों पर अवलंवित नानाविध भाव और रस के स्थायी भावों के अनुभावों के पात्रों के अनुरूप वाचिक अभिनय, सौन्दर्यवर्धक नाना प्रसाधन और शारीरिक अभिनय के अनुरूप बल प्रदान किया।।५२-६३।।

व्याख्या—देवराज इन्द्र ने अपना वह ध्वज प्रदान किया, जिसका उपयोग विघ्न-शान्ति के निमित्त पूजा के लिए आवश्यक था। कुटिलक विदूषक के उपयुक्त टेढ़ी छड़ी थी, जो ब्रह्मा का आयुध-दण्ड था और डराने-धमकाने के लिए प्रयुक्त होता था। 'भृंगार' (कमण्डलु) सूत्रधार के दोनों और मंडराने वाले पारिपार्श्वकों के उपयुक्त थे। सूर्य ने उस छत्र, पटमण्डप को प्रदान किया, जो मेघों के आकार का था। यतः मेघों की उत्पत्ति सूर्य से होती है, अतः उसका प्रयोग आतपनिवारण के लिए किया जाता है। शिव ने दैवी और मानुषी सिद्धि को प्रदान किया, जिसका उपयोग व्यापक था। वायुद्वारा प्रदत्त व्यजन, पंखा, पसीना दूर करने के लिए उपयुक्त था। सिंहासन-मुकुट आदि उपकरण राजोचित भूमिका के उपयुक्त थे। जो नाट्यशास्त्र-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मर्मज्ञ थे उन यक्ष, राक्षस और नागजाति के दिव्ययोनि प्राणियों ने भरतमुनि को अभीष्ट सामग्री प्रदान की, जिनमें भाषित (उन उन पात्रों की भूमिका के अनुरूप वाचिक-अभिनय) की शिक्षा थी। सामान्य रूप से रक्त मांस आदि उपकरण भय, जुगुप्सा आदि स्थायी भावों के उद्दीपन विभाव हैं, जो यक्ष और राक्षस जातियों के हर्ष और उत्साह के विभाव वन जाते हैं। यक्ष और राक्षसों ने भरतमुनि के पुत्रों को इसकी शिक्षा दी। उसी प्रकार उन्होंने रसों की शिक्षा प्रदान की अर्थात् उन रसों के स्थायी और व्यभिचारी भावों के अनुभाव कैसे होते हैं उसकी शिक्षा प्रदान की। किस पात्र के अनुरूप कौन से सौन्दर्य-प्रसाधन होते हैं उनका उपयोग करना सिखलाया। साथ ही उन्हें उस व्यायाम की भी शिक्षा दी जो आंगिक अभिनय करने के लिए बलसंवर्द्धन करते थे। इससे यह सूचित होता है कि नाट्य का प्रयोग कुछ शिक्षा देने के लिए है। उससे सामाजिकों को कुछ धन, ज्ञान और संतोष मिलता है। अतः ऐसे प्रयोग करने चाहिए, जिससे नाट्यशाला के दर्शक सन्तुष्ट हों।।५९-६३।।

एवं प्रयोगे प्रारब्धे दैत्यदानवनाशने ।
अभवन् क्षुभिताः सर्वे दैत्या ये तत्र सङ्गताः ।।६४।।
विरूपाक्षपुरोगा[1]श्च विघ्नान् प्रोत्साह्य[2] तेऽब्रुवन् ।
न क्षमिष्यामहे[3] नाट्यमेतदागम्यतामिति ।।६५।।
ततस्तैरसुरैः सार्धं विघ्ना[4] मायामुपाश्रिताः ।
वा[5]चश्चेष्टां स्मृतिं चैव स्तम्भयन्ति स्म नृत्यताम् ।।६६।।
तथा विध्वंसनं दृष्ट्वा सूत्रधारस्य[6] देवराट् ।
कस्मा[8]त् प्रयोगवैषम्यमित्युक्त्वा ध्यानमाविशत् ।।६७।।

अन्वयः–एवं दैत्यदानवनाशने प्रयोगे प्रारब्धे (सति) ये तत्र सङ्गताः (ते) सर्वे दैत्याः क्षुभिताः अभवन्। विरूपाक्षपुरोगाश्च ते विघ्नान् प्रोत्साह्य अब्रुवन्-'एतत् नाट्यं न क्षमिष्यामहे, आगम्यताम्' इति। ततः मायाम् उपाश्रिताः विघ्नाः तैः असुरैः सार्द्धं नृत्यतां वाचः चेष्टां स्मृतिं चैव स्तम्भयन्ति स्म। देवराट् एवं सूत्रधारस्य विध्वंसितं दृष्ट्वा 'कस्मात् प्रयोगवैषम्यम्' इति उक्त्वा ध्यानम् आविशत्।।६४-६७।।

अभिनव-भारती

अथ विघ्नोपशमनाय जर्जरपूजा कार्येति दर्शयितुमितिहासेनोपक्रमते–एवं प्रयोग इति। दैत्यानां विनाशनं यत्र प्रयोज्यतया। आगम्यतामिति। अवधार्यतां यदि वा सम्भूयाऽऽस्यताम्। मायामिति अदृश्यत्वमित्यर्थः। चेष्टेत्याङ्गिकी। यद्यपि

---

१. पुरोगास्तु, पुरोगांस्तु।

२. उत्सा(त्या)द्य, प्रोत्साद्य।

३. इच्छामहे, ईक्षामहे, इष्यामहे।

४. विघ्नमायाम् ।

५. वचः

६. विध्वंसितं।

७. तत्र तेषां स देवराट् ।

८. तस्मात् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्मृतिस्तम्भनेन सर्वं स्तम्भितं भवति तथापि तत्तदभिनेय-प्राधान्येन तदेव स्तम्भितमित्युक्तम्। सूत्रधारस्येति। सपरिवारस्येति। प्रस्तावनाप्रयोगमध्य एवाऽयं विघ्न इति यावत्। ध्यानमिति। यत्र माया न प्रभवति।।६४-६७।।

तात्पर्य-दीपिका

भावार्थ—इस प्रकार दैत्य और दानवों का विनाशकारी नाट्यप्रयोग प्रारम्भ होने पर वहां जितने एकत्रित थे, वे सभी दैत्य क्षुब्ध हुए और विरूपाक्ष आदि विघ्नकारी तत्त्वों को प्रोत्साहित करते हुए बोले— 'हम इस नाट्य-प्रयोग को सहन नहीं कर सकते। आप आएं।' तब उन विघ्नकारी तत्त्वों ने माया, इन्द्रजाल का सहारा लेकर नर्तकों की वाणी, सभी चेष्टाओं और स्मृति का भी स्तम्भन कर दिया। इस प्रकार देवराज इन्द्र ने सूत्रधार के नाट्य-प्रयोग में विनाश उपस्थित देखकर कहा— 'इसके प्रयोग में त्रुटि क्यों है?' यह कहकर वे समाधिस्थ हो गए।।६४-६७।।

व्याख्या—सूत्रधार द्वारा प्रारंभ किये गये नाट्यप्रयोग की प्रस्तावना में ही विघ्न-बाधा का इतिहास यह संकेत कर रहा है कि विघ्न-बाधा शांत करने के लिए जर्जर की पूजा करनी चाहिए। इसका वर्णन अग्रिम पद्यों में द्रष्टव्य है। अभिनवगुप्तापादाचार्य के अनुसार वे विघ्नकारी तत्त्व माया अर्थात् अदृश्य होने की शक्ति का आश्रय लेकर वहां उपस्थित हुए। यद्यपि स्मृति का स्तम्भन करने पर सभी कार्य-कलाप स्तम्भित होते हैं, तथापि अभिनय की प्रधानता के कारण यहां वाणी (वाचिक अभिनय) और चेष्टा (आंगिक अभिनय) का पृथक् पृथक् उल्लेख किया गया है। वहां सूत्रधार अकेले उपस्थित नहीं थे, अपितु परिवारसहित उपस्थित थे। सूत्रधार की परिभाषा इस प्रकार है—

नाट्योपकरणादीनि सूत्रमित्यभिधीयते ।
सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते ।।

उनके द्वारा मंचित प्रस्तावना के नाट्यप्रयोग के बीच में ही विघ्नबाधा उपस्थित देखकर देवराज इन्द्र ने वह ध्यान लगाया, जहां दैत्यों की माया (अदृश्यशक्ति) भी व्यर्थ हुई।।६४-६७।।

अथाऽपश्यत् स[1]दो विघ्नैःसमन्तात् परिवारितम्।
सहेतरैः सूत्रधारं नष्टसंज्ञं जडीकृतम् ।।६८।।
उत्थाय त्वरितं शक्रो गृहीत्वा ध्वजमुत्तमम् [2] ।।
सर्वरत्नोज्ज्वलतनुः[3] किञ्चिदु[4]द्वृत्तलोचनः ।।६९।।
रङ्गपीठगतान् विघ्नानसुरांश्चैव देवराट् ।
जर्जरीकृतदेहांस्तानकरोज्जजरेण सः ।।७०।।
निहतेषु[5] च सर्वेषु विघ्नेषु सह दानवैः ।
सम्प्रहृष्य ततो वाक्यमाहुः सर्वे दिवौकसः ।।७१।।
अहो प्रहरणं दिव्यमिदमासादितं त्वया ।

१. तदा।
२. क्रोधात् जग्राह तं ध्वजम्, अथोत्थाय द्रुतं क्रोधाद्दिव्यं जग्राह स ध्वजम् ।
३. सर्वरत्नोज्ज्वलन्तं तु।
४. कोपाद्।
५. गतेषु तवतेषु।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जर्जरीकृतसर्वाङ्गा येनैते दानवाः कृताः[१] ।।७२।।
यस्मादनेन ते विघ्नाः सासुरा जर्जरीकृताः ।
तस्माज्जर्जर एवेति[२] नामतोऽयं भविष्यति ।।७३।।
शेषा[३] ये चैव हिंसार्थमुपयास्यन्ति[४] हिंसकाः[५] ।
दृष्ट्वैव जर्जरं तेऽपि गमिष्यन्त्येवमेव तु ।।७४।।
एवमेवास्त्विति ततः शक्रः प्रोवाच तान् सुरान् ।
रक्षाभूतश्च सर्वेषां भविष्यत्येष[६] जर्जरः ।।७५।।
प्रयोगे प्रस्तुते ह्येवं स्फीते शक्रमहे पुनः ।
त्रासं सञ्जनयन्ति स्म विघ्नाः शेषास्तु[७] नृत्यताम् ।।७६।।
दृष्ट्वा तेषां व्यवसितं दैत्यानां[८] विप्रकारजम् ।
उपस्थितोऽहं ब्रह्माणं सुतैः सर्वैः समन्वितः ।।७७।।
निश्चिता भगवन्! विघ्ना नाट्यस्याऽस्य विनाशने ।
अस्य[९] रक्षाविधिं सम्यगाज्ञापय सुरेश्वर ।।७८।।
ततश्च[१०] विश्वकर्माणं [११]ब्रह्मोवाच प्रयत्नतः ।
कुरु लक्षणसम्पन्नं नाट्यवेश्म महामते[१२] ।।७९।।
ततोऽचिरेण कालेन विश्वकर्मा महच्छुभम् ।
सर्वलक्षणसम्पन्नं कृत्वा नाट्यगृहं तु सः[१३] ।।८०।।
प्रोक्तवान् द्रुहिणं गत्वा सभायां तु कृताञ्जलिः ।
सज्जं नाट्यगृहं देव! तदवेक्षितुमर्हसि ।।८१।।
ततः सह महेन्द्रेण सुरैः सर्वैश्च सेतरैः[१४] ।
आगत[१५]स्त्वरितो द्रष्टुं द्रुहिणो नाट्यमण्डपम् ।।८२।।
दृष्ट्वा नाट्यगृहं ब्रह्मा प्राह सर्वान् सुरांस्ततः ।
अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः ।।८३।।

अन्वयः–अथ (देवराट्) विघ्नैः समन्तात् परिवारितं सदः इतरैः सह नष्टसंज्ञं जडीकृतं सूत्रधारम् अपश्यत्।।६८।।

सर्वरत्नोज्वलतनुः देवराट् सः शक्रः त्वरितम् उत्थाय, उत्तमं ध्वजं गृहीत्वा

---

१. नाट्यविध्वंसिनः सर्वे येन ते जर्जरीकृताः।
२. इत्येव।
३. सेर्षा।
४. उपस्थास्यन्ति।
५. विघ्नकाः।
६. एव।
७. मद्वधबुद्धयः, सेर्षास्तु।
८. मदर्थे।
९. अतो।
१०. स।
११. आह ब्रह्मा।
१२. चकार सः।
१३. कृत्वा यथोक्तमेवं तु गृहं पद्मोद्भवाज्ञया।
१४. सत्तमैः
१५. अगच्छत्, आगच्छत्।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 7018

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

किञ्चित् उद्वृतलोचनः (सन्) रङ्गपीठगतान् विघ्नान् तान् असुरान् चैव जर्जरेण जर्जरीकृतदेहान् अकरोत्।।६९।।७०।।

दानवैः सह सर्वेषु च विघ्नेषु निहत्तेषु (सत्सु), ततः सर्वे दिवौकसः सम्प्रहृष्य वाक्यम् आहुः।।७१।।

'अहो! त्वया इदं दिव्यं प्रहरणम् आसादितम्'; येन एते दानवाः जर्जरीकृत सर्वाङ्गाः कृताः।।७२।।

यस्मात् अनेन सासुराः विघ्नाः जर्जरीकृताः, तस्मात् अयं जर्जर एव इति नामतः भविष्यति।।७३।।

ये चैव शेषाः हिंसकाः शेषार्थम् उपयास्यन्ति, तेऽपि जर्जरं दृष्टैव एवमेव तु गमिष्यन्ति'।।७४।।

ततः शक्रः तान् सुरान् 'एवमेव अस्तु, एषः जर्जरः सर्वेषां रक्षाभूतश्च भविष्यति' इति प्रोवाच।।७५।।

पुनः स्फीते शक्रमहे एवं प्रयोगे प्रस्तुते सति शेषास्तु विघ्नाः नृत्यतां त्रासं सञ्जनयन्ति स्म।।७६।।

तेषां दैत्यानां विप्रकारजं व्यवमितं दृष्ट्वा अहं सर्वैः सुतैः समन्वितः (सन्) ब्रह्माणम् उपस्थितः।।७७।।

'भगवन्! अस्य नाट्यस्य विनाशने विघ्नाः निश्चिताः। सुरेश्वर! अस्य रक्षाविधिं सम्यक् आज्ञापय'।।७८।।

ततश्च ब्रह्मा विश्वकर्माणं प्रोवाच–'महामते! प्रयत्नतः लक्षणसम्पन्नं नाट्यवेश्म कुरु।'।।७९।।

ततः सः विश्वकर्मा अचिरेण कालेन सर्वलक्षणसम्पन्नं शुभं महत् नाट्यगृहं कृत्वा द्रुहिणं गत्वा सभायां कृताञ्जलिः (सन्) प्रोक्तवान्–' देव! नाट्यगृहं सज्जम्, तत् अवेक्षितुम् अर्हसि'।।८०-८१।।

ततः द्रुहिणः महेन्द्रेण सर्वैश्च सेतरैः सुरैः सह त्वरितः नाट्यमण्डपं द्रष्टुं समागतः।।८२।।

ततः ब्रह्मा नाट्यगृहं दृष्ट्वा सर्वान् सुरान् प्राह–'अंशभागैः भवद्भिः तु अयं नाट्यमण्डपः रक्ष्यः'।।८३।।

अभिनव-भारती

सद इति, यत्र प्रयोगः क्रियते– सीदत्यस्मिन्निति। जीर्यत्यतिशयेनेति पचाद्यचि यङ्लुकि रूपम्। अतिशयेन जीर्णीकृतो देहो येषान्ते तथा। जर्जरेणेति यङ्लुगन्ताण्णिचि पुनः पचाद्यचि रूपम्। एवं राज्ञा सिद्धिविघातका दण्ड्या इति दर्शितम्। यदि वा मूलत एव तत्परिरक्षायै मण्डपः कार्यः। ये च दण्डस्याऽविषया वातातपवर्षादयश्च तत्कृतो हि सिद्धिविघातो मण्डपे सति न भवति। एतेनैवाऽभिप्रायेण पुराकल्पमाह–प्रयोग इत्यादि। शेषा इति। जर्जरीकृतशरीरशेषा अपीत्यर्थः। यद्वक्ष्यति–निश्चिता भगवन्! विघ्ना इति। तथाऽस्मिन् जर्जरीकरणकाले एते चाऽसन्निहिता अभूवन्। त्रासमिति। सर्वथा तु न शक्ता। नाशयितुमिति जर्जरप्रभावः। गमिष्यन्त्येवमेव इति य उक्तः सोऽज्ञः (ये वक्तारः तेऽज्ञाः) (?)। ततो विश्वकर्मेति। वास्तुविद्यातत्त्वविदो नाट्यमण्डपे

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्थपतित्वं सूचयति। द्रुहिण इति ब्रह्मा। इतरे विद्याधरगन्धर्वाद्याः। अंशैर्यानि भजनान्यधिष्ठानानि तैः। मण्डपस्यांशेषु वः भवतां ये तृतीयचतुर्थादयो भागास्तैः।।६८-८३।।

तात्पर्य-दीपिका

भावार्थ और व्याख्या–पश्चात् देवराज इन्द्र ने अनेक विघ्नकारी तत्त्वों से घिरी हुई 'सदस्' (सभा) को और अपने परिवार के साथ चेतनाशून्य और जडवत् निश्चल सूत्रधार को देखा।

अभिनवगुप्त के अनुसार यहां 'सदः' का अर्थ वह सभा है, जहां नाट्य-प्रयोग किया जा रहा था–'सीदति अस्मिन्निति सदः' अथवा 'सीदन्ति अस्याम् इति सदः।' यह शब्द 'सद्' धातु के 'असुन्' प्रत्यय से निष्पन्न है। यह स्त्रीलिङ्ग और नपुंसकलिंग दोनों में चलता है–'स्त्रीनपुंसकयोः सदः' (अमर. २।७।१५)।।६८।।

सभी रत्नजटित अलंकारों से अपने शरीर को उज्ज्वल करते हुए देवराज इन्द्र ने अविलम्ब उठकर और उत्तम ध्वज को लेकर कुछ दृष्टि घुमाते हुए उस रङ्गमंच पर उपस्थित विघ्नकारी तत्त्वों और असुरों को 'जर्जर' द्वारा शिथिल कर दिया।

जर्जरीकृतदेहांस्तानकरोत् जर्जरेण सः

जर्जरीकृतः अतिशयेन जीर्णीकृतः देहः येषां ते जर्जरीकृतदेहाः तान्, उस ध्वज से उक्त विघ्नकारी तत्त्वों और असुरों के शरीर को जीर्ण-शीर्ण कर दिया गया था, अत एव उस ध्वज का नाम 'जर्जर' पड़ा। 'जॄ' धातु का यह यङ्लुगन्त रूप है। णिच् प्रत्यय और 'अच्' प्रत्यय से यह निष्पन्न होता है। 'जीर्यति अतिशयेन इति जर्जरः' यह इसकी व्युत्पत्ति है। ७२ और ७३वें पद्य में इस नाम की सार्थकता प्रदर्शित की गयी है।।६९।।७०।।

दानवों के साथ समस्त विघ्नकारी तत्वों के मारे जाने पर स्वर्गलोक के वासी दिव्य-योनि के सभी प्राणी प्रसन्न होकर बोले–।।७१।।

'अहो! आपने आपने वह दिव्य शस्त्र प्राप्त किया है, जिसके द्वारा इन दानवों के शरीर को पस्त कर दिया गया है'।।७२।।

अतः इसके द्वारा असुरों के साथ समस्त विघ्नकारी तत्त्वों को जीर्ण-शीर्ण कर दिया गया। अतः आगे चलकर इसका नाम ही 'जर्जर' पड़ेगा[1]।।७३।।

अवशिष्ट जो हिंसाकारी असुर होंगे, वे जर्जर को देखते ही इसी स्थिति को प्राप्त करेंगे।।७४।।

---

१. टिप्पणी– रंग दैवतपूजन नामक तृतीय अध्याय में जर्जरपूजा का विधान है, जिसमें उससे यह प्रार्थना की जाती है–

त्वं महेन्द्रप्रहरणं सर्वदानवसूदनम् ।
निर्मितं सर्वदेवैश्च सर्वविघ्ननिवारणम् ।।
नृपाय विजयं देहि रिपूणां च पराजयम् ।
गोब्राह्मणहितं चैव नाट्यस्य च विवर्धनम् ।।
ना.शा. ३।१२-१४ ।।

जर्जरपूजा के अनन्तर नाट्यमण्डप में रात्रिवास कर रंगदेवता की पूजा का विधान है। सभी देवताओं की पूजा के बाद पुनश्च जर्जरपूजा के उपरान्त समस्त विघ्नों का शमन होता है। (जर्जर का लक्षण द्र० ना० शा० २३।१६४-१७१)

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पश्चात् इन्द्र ने कहा– 'ऐसा ही हो, यह जर्जर सभी का रक्षक होगा। इस से यह सूचित होता है कि विघ्नकारी तत्त्वों को राजाद्वारा दण्डित किया जाना चाहिए।।७५।।

पुनः देवराज इन्द्र का ध्वजमहोत्सव उपस्थित होने पर जब नाट्य प्रयोग प्रारंभ हुआ, तब अवशिष्ट विघ्नकारी तत्त्व नर्त्तकों के मध्य उपस्थित होकर उन्हें कष्ट देने लगे।।७६।।

दैत्यों के द्वारा किये जाने वाले उस अपकार-कारक विनाशकारी प्रयास को देखकर मैं (भरतमुनि) अपने पुत्रों के साथ ब्रह्मदेव के समक्ष उपस्थित हुआ और उनसे यह प्रार्थना की।।७७।।

"भगवन् ! ये विघ्नकारी तत्त्व नाट्य-मण्डप का विनाश करने का निश्चय कर चुके हैं। अतः आप उसकी रक्षा का उपाय करें। और उसके लिए आदेश दें"।।७८।।

पश्चात् ब्रह्मदेव ने स्थापत्यकलाविशारद विश्वकर्मा को बुलाकर आज्ञा दी– "कुशाग्रबुद्धे! आप सभी लक्षणों, विशेषताओं से, सम्पन्न नाट्यमण्डप के निर्माण के लिए प्रयत्नशील हों"।।७९।।

ब्रह्मदेव की आज्ञा पाते ही विश्वकर्मा ने अल्पावधि में सभी विशेषताओं से युक्त नाट्यमण्डप की रचना की और ब्रह्मदेव से करबद्ध प्रार्थना की– "भगवन् !नाट्यमण्डप तैयार है, आप उसे देख सकते हैं"।।८०-८१।।

अनन्तर ब्रह्मदेव देवराज इन्द्र देवगण और दूसरे विद्याधर-यक्ष आदि के साथ शीघ्र ही नाट्यमण्डप देखने के लिए उपस्थित हुए।।८२।।

उस नाट्यमण्डप को देखकर ब्रह्मदेव ने देवों को आज्ञा दी– 'आपलोग अपने-अपने अंशों से इसकी रक्षा करें।'।।८३।।

नाट्यमण्डप–नाट्यमण्डप के निर्माण के पूर्व खुले आंगन में नाट्यप्रयोग होते थे। विघ्नबाधा उपस्थित होने पर नाट्यप्रयागों की रक्षा के लिए इसकी आवयकता का अनुभव किया गया। नाट्यमण्डप का विधान इसलिए भी आवश्यक था कि उसके कारण वर्षा-आतप आदि से भी बचाव होता है। नाट्यमण्डप स्तम्भों द्वारा अनेक भागों में विभक्त होता था। उनमें कुछ भाग भजनादि के लिए निर्धारित था। ब्रह्मदेव ने देवों को यह आदेश दिया कि 'उनके चतुर्थ आदि जो विभाग हैं, उनमें उपस्थित होकर नाट्यमण्डप की रक्षा करें।' यही **अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः** इस पद्यार्द्ध का अभिप्राय है।।८३।।

रक्षणे मण्डपस्याऽथ[1] विनियुक्तस्तु चन्द्रमाः ।
यथादिग्लोकपालाश्च विदिक्ष्वपि च मारुतः[2] ।।८४।।
नेपथ्यभूमौ मित्रस्तु निक्षिप्तो वरुणोऽम्बरे[3] ।
वेदिकारक्षणे वह्निर्भाण्डे सर्वदिवौकसः[4] ।।८५।।
वर्णाश्चत्वार एवाऽथ[5] स्तम्भेषु विनियोजिताः ।
आदित्याश्चैव रुद्राश्च स्थिताः[6] स्तम्भान्तरेष्वथ[7] ।।८६।।

१. मण्डपेऽस्याथ, मण्डपस्यास्य।
२. नियुक्तो रजनीकरः।
३. वरुणेश्वरः।
४. वेदिकां पावकः पातुं भाण्डं सर्वे दिवौकसः।
५. अस्य।
६. न्यस्ताः।
७. स्तंभान्तरेषु च।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

[१]धारणीष्वथ भूतानि शालास्वप्सरसस्तथा ।
सर्ववेश्मसु यक्षिण्यो महीपृष्ठे महोदधिः ।।८७।।

अन्वयः-अथ मण्डपस्य रक्षणे तु चन्द्रमाः विनियुक्तः, यथा दिग्लोकपालाश्च विदिक्ष्वपि च मारुतः विनियुक्ताः।।८४।।

नेपथ्यभूमौ तु मित्रः निक्षिप्तः, वरुणः अम्बरे निक्षिप्तः, वह्निः वेदिकारक्षणे निक्षिप्तः, सर्वदिवौकसः भाण्डे निक्षिप्ताः।।८५।।

अथ च चत्वारः वर्णा एव स्तम्भेषु विनियोजिताः। अथ आदित्याः रुद्राश्चैव स्तम्भान्तरेषु स्थिताः।।८६।।

अथ धारणीषु भूतानि स्थितानि, शालासु अप्सरसः स्थिताः, यक्षिण्यः सर्ववेश्मसु स्थिताः, महोदधिः महीपृष्ठे स्थितः।।८७।।

अभिनव-भारती

अंशविभागमेवाह-रक्षण इति। अनेन चैतत्तुल्या एव मण्डपभागरक्षा काचिन्नियोज्या इति दर्श्यते। मण्डपस्य सर्वस्याऽधिष्ठाता हि सौम्यप्रकृतिः सोमः प्रधानो योज्य इति दर्शयति-चन्द्रमा इति। अपि चेति। विदिक्ष्विति। न केवलं पश्चिमोत्तररूपे स्वकोणे यावदन्यास्वपि विदिक्षु। चकाराद्दिक्ष्वपि। ते हि घर्मदोषवारकत्वादत्यन्तोपकारिणः। अनेनं गवाक्षकरणं सूच्यत इत्येके। आदित्ये मित्रशब्दः पुल्लिङ्ग इति। तेन यद्वार्तिककारी (रीयं) तदुपलक्षितो नर्तकीहि (भिः) लज्जापरिहारहेतोः नपुंसको नेपथ्यगृहे इति तदपरामृष्टाभिधानम्। मित्र इति तेजस्विता आहार्योपयोगी रत्नादेरुक्ता। वेदिका रङ्गवेदिका, तत्र तीक्ष्णोऽधिष्ठातेत्यर्थः। भाण्ड इति त्रिपुष्करे सोपकरणे। दिवौकसो मेघा मन्द्रगम्भीरशब्दसिद्धये। इत्येवं सर्वत्र दृष्टमपि सदृशोपलक्षणान्तं प्रयोजनमुत्प्रेक्ष्यम्। सर्वथा तदलाभे नियमादृष्टमेव। वर्णा इति तदधिष्ठातारो देवता-विशेषाः। स्तम्भान्तरेष्विति। वर्णस्तम्भचतुष्कादिरित्येषु न अन्येषु स्तम्भेष्वित्यर्थः।

शालास्विति। स्तम्भद्वयमध्यवेश्मनि गवाक्षनेपथ्यगृहद्वितीयभूमि-सन्निवेशादिति।।८४-८७।।

तात्पर्य-दीपिका

भावार्थ-अनन्तर नाट्य-मण्डप की रक्षा करने के लिए चन्द्रमा की, दिशा-क्रम से इन्द्रादि लोकपालों की और उपदिशाओं में अन्य देवों की नियुक्ति की गयी।।८४।।

नेपथ्य अर्थात् परदे के पीछे प्रसाधन-कक्ष की रक्षा करने के लिए सूर्य की, आकाश में वरुण की, रङ्गमंच की रक्षा के लिए अग्नि की और वाद्य-यन्त्रों की रक्षा के लिए दिवौकस अर्थात् मेघों की प्रतिष्ठा की गयी।।८५।।

अनन्तर चारों वर्णों के अनुयायियों को खम्भों की रक्षा के लिए अधिकृत किया गया। अनन्तर बारह आदित्य और एकादश रुद्रों को खम्भों के मध्य उनकी रक्षा के लिए प्रतिष्ठित किया गया।।८६।।

अनन्तर धारणी (धरनों) के बीच पञ्च महाभूतों के अधिष्ठाता देवताओं को और

१. धारणीषु (धरणीषु) स्थिता भूताः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शालाओं के बीच अप्सराओं को प्रतिष्ठित किया गया। यक्षिणियां नाट्यमण्डप के सभी कक्षों में उनकी रक्षा के लिए अवस्थित हुईं। महासागर पृथ्वीतल पर अवस्थित हुआ।।८७।।

व्याख्या–रक्षणे मण्डपस्याऽथ (८४) से प्रारम्भ कर यान्येतानि नियुक्तानि (९८) पद्य तक सोलह पद्यों में नाट्यमण्डप के उस अंशविभाग का निरूपण किया गया है, जिसकी रक्षा के लिए चन्द्रमा से लेकर हर अर्थात् शिव पर्यन्त सभी देवताओं को अधिकृत किया गया। इसका निष्कर्ष यह है कि नाट्यमण्डप के भागों की रक्षा के लिए इसी प्रकार की व्यवस्था होनी चाहिए।

रक्षणे मण्डपस्याऽथ विनियुक्ततु चन्द्रमाः–सम्पूर्ण नाट्यमण्डप की रक्षा के लिए सौम्यप्रकृति चन्द्रमा को इसलिए अधिकृत किया गया कि सम्पूर्ण मण्डप का अधिष्ठाता सौम्य प्रकृति होना चाहिए।

यथादिक्लोकपालाश्च-दिशाक्रम से लोकपालों की नियुक्ति की गयी। वे आठ हैं–

इन्द्रो वह्निः पितृपतिनैर्ऋतो वरुणो मरुत्।
कुवेर ईशः पतयः पूर्वादीनां दिशां क्रमात्।।
(अमर.१।३।२-३)

उनका क्रम इस प्रकार है–(१) पूर्वदिक्पाल-इन्द्र, (२) पूर्व-दक्षिण (आग्नेय), दिक्पाल अग्नि, (३) दक्षिण दिक्पाल–यम, (४) दक्षिण-पश्चिम (नैर्ऋत्य) दिक्पाल–निर्ऋत, (५) पश्चिम-दिक्पाल–वरुण, (६) पश्चिमोत्तर (वायव्य) दिक्पाल–वायु, (७) उत्तरदिक्पाल–कुवेर और (८) उत्तरपूर्व (ईशान्य) दिक्पाल–ईश।

विदिक्ष्वपि च मारुतः–वायु को न केवल अपने पश्चिमोत्तर कोण, अपितु दिशा-उपदिशाओं में भी रक्षा के लिए नियुक्त किया गया, क्योंकि पसीना दूर करने के कारण वे अत्यन्त उपकारी होते हैं। 'मरुत्' शब्द के दो अर्थ हैं–(१) पवन और (२) देव। **मरुतौ पवनामरौ** (अमर.३।३।५९) यहां प्रथम अर्थ विवक्षित है। इसका तात्पर्य यह है कि नाट्यमण्डप में चारों ओर खिड़कियां-झरोखे आदि होने चाहिए। साथ ही वहां पंखे आदि की व्यवस्था होनी चाहिए।

नेपथ्यभूमौ मित्रस्तु–सूर्यवाची मित्रशब्द पुल्लिंग है। नेपथ्यभूमि में इसकी उपयोगिता इसलिए है कि आहार्य-अभिनय में उज्ज्वल रत्नादि आवश्यक हैं। उनका तेज सूर्य ही सुरक्षित रख सकता है। कुछ लोग नपुंसकलिंगी मित्र शब्द को मानकर उसका अर्थ नर्तकियों का वह नपुंसक मित्र करते हैं, जिसकी योजना लज्जा परिहार के लिए नेपथ्यगृह में की जानी चाहिए। किन्तु वार्तिककार की यह विवेचना अविवेकपूर्ण है।

वेदिकारक्षणे वह्निः–वेदिका अर्थात् रंगवेदिका या रंगमंच की रक्षा के लिए अग्नि की नियुक्ति इसलिए की गयी कि वहां का अधिष्ठाता तीक्ष्ण होना चाहिए।

भाण्डे सर्वदिवौकसः–यहां दिवौकस का अर्थ स्वर्गलोक के निवासी देव न होकर आकाशविहारी मेघ है। भाण्ड का तात्पर्य तीन प्रकार के अवनद्ध वाद्य से है– अवनद्धं तु पौष्करम् (ना.शा.-२८।२)। अभिनवगुप्तपादाचार्य इसी की ओर संकेत कर रहे हैं–**भाण्ड इति त्रिपुष्करे सोपकरणे**। अवनद्ध वाद्य तीन प्रकार के होते हैं–(१) मृदङ्ग,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(२) पणव (नगाड़ा), और (३) दर्दुर (डुग्गी)। उनकी रक्षा के लिए मेघों को इसलिए नियुक्त किया गया कि जिस प्रकार मेघों से मन्द्र और गम्भीर नाद निकलता है उसी प्रकार उन अवनद्ध वाद्यों के भी स्वर निकलने हैं।

वर्णाश्चत्वार एवाऽथ स्तम्भेषु विनियोजिताः–अभिनवगुप्तपाद 'वर्ण' शब्द का अर्थ देवताविशेष करते हैं। द्वितीय अध्याय के विचार से इसका अर्थ ब्राह्मणदि चार वर्ण प्रतीत होता है।

आदित्याश्चैव रुद्राश्च स्थिताः स्तम्भान्तरेष्वथ–यहां आदित्य और रुद्र का अभिप्राय गणदेवता से है। **आदित्या द्वादश प्रोक्ताः** इस वचन के अनुसार बारह आदित्य हैं। 'आदित्य' सूर्य का अपर पर्याय है। उसके बारह नाम प्रसिद्ध हैं– (१) मित्र, (२) रवि, (३) सूर्य, (४) भानु, (५) खग, (६) पूषा, (७) हिरण्यगर्भ (८) मरीचि, (९) आदित्य, (१०) सविता, (११) अर्क और (१२) भास्कर। **रुद्राश्चैकादश स्मृताः**– ग्यारह रुद्रों की गणना इस प्रकार है–

अजैकपादर्हिबुघ्नो विरूपाक्षः सुरेश्वरः ।
जयन्तो बहुरूपश्च त्र्यम्बकोऽप्यपराजितः ।।
वैवस्वतश्च सावित्रो हरो रुद्रा इति स्मृताः ।

(१) अज, (२) एकपाद् , (३) अहिर्बुघ्न, (४) विरूपाक्ष, (५) सुरेश्वर, (६) जयन्त, (७) अपराजित, (८) वैवस्वत, (९) सावित्र, (१०) हर और (११) रुद्र ये एकादश शिवस्वरूप एकादश रुद्रों में परिगणित हैं। वे द्वादश आदित्य और एकादश रुद्र द्वितीय अध्याय में वर्णित वर्णचतुष्क स्तम्भों के अन्तराल में उनकी रक्षा के लिए अधिकृत किये गए, अन्य स्तम्भों के अंतराल में नहीं। यह अभिनवभारतीसम्मत तात्पर्य है।

शालास्वप्सरसस्तथा–मञ्जुकेशी से लेकर कलमा तक अप्सराओं को उन शालाओं की रक्षा के लिए नियुक्त किया गया था,जो दो खम्भों के बीच होती थीं। उनमें खिड़कियों, नेपथ्यगृह आदि का विभाग रहता था।।८४-८७।।

द्वारशाला[१]नियुक्तौ तु कृतान्तः काल एव च ।
स्थापितौ द्वारपत्रेषु[१क] नागमुख्यौ महाबलौ ।।८८।।
देहल्यां यमदण्डस्तु शूलं तस्योपरि स्थितम् ।
द्वारपालौ स्थितौ चोभौ नियतिर्मृत्युरेव च ।।८९।।
पार्श्वे च[२] रङ्गपीठस्य महेन्द्रः स्थितवान् स्वयम् ।
स्थापिता मत्तवारण्यां विद्युद् दैत्यनिषूदनी ।।९०।।
स्तम्भेषु मत्तवारण्याः स्थापिताः परिपालने[३] ।
भूतयक्षपिशाचाश्च गुह्यकाश्च महाबलाः[४] ।।९१।।
जर्जरे तु[५] विनिक्षिप्तं वज्रं दैत्यनिबर्हणम् ।
तत्पर्वसु[६] विनिक्षिप्ताः सुरेन्द्राः ह्यमितौजसः ।।९२।।

---

१. शाखा
१क. पात्रेषु।
२. तु।
३. परिरक्षणे।
४. भूता यक्षाः पिशाचाश्च गुह्यकाश्च महाबलाः।
५. चैव निक्षिप्तं।
६. च निक्षिप्ताः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शिरःपर्वस्थितो[1] ब्रह्मा द्वितीये शङ्करस्तथा ।
तृतीये च स्थितो[2] विष्णुश्चतुर्थे स्कन्द एव च ।।९३।।
पञ्चमे च महानागाः शेषवासुकितक्षकाः ।
एवं विघ्नविनाशाय स्थापिता जर्जरे सुराः ।।९४।।
रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठितः ।
[3]इष्ट्यर्थं रङ्गमध्ये तु क्रियते पुष्पमोक्षणम् ।।९५।।
पातालवासिनो ये च यक्षगुह्यकपन्नगाः ।
अधस्ताद् रङ्गपीठस्य रक्षणे ते[4] नियोजिताः ।।९६।।
नायकं रक्षतीन्द्रस्तु नायिकां च[5] सरस्वती ।
विदूषकमथौङ्कारः[6] शेषास्तु प्रकृतीर्हरः ।।९७।।
यान्येतानि नियुक्तानि दैवतानीह रक्षणे ।
एतान्येवाऽधिदैवानि[7] भविष्यन्तीत्युवाच सः ।।९८।।

अन्वयः–कृतान्तः काल एव च द्वारशाखानियुक्तौ। द्वारपत्रेषु महाबलौ नागमुख्यौ स्थापितौ। देहल्यां तु यमदण्डः स्थितः। तस्य उपरि शूलं स्थितम्। नियतिः मृत्युरेव च उभौ द्वारपालौ स्थितौ। रङ्गपीठस्य च पार्श्वे महेन्द्रः स्वयं स्थितवान्। मत्तवारण्यां दैत्यनिषूदनी विद्युत् स्थापिता। स्तम्भेषु मतवारण्याः परिपालने भूतयक्षपिशाचाश्च महाबलाः गुह्यकाश्च स्थापिताः। जर्जरे तु दैत्यनिबर्हणं वज्रं विनिक्षिप्तम्। हि तत्पर्वसु च अमितौजसः सुरेन्द्राः विनिक्षिप्ताः। ब्रह्मा शिरःपर्वस्थितः, तथा शङ्करः द्वितीये स्थितः, विष्णुः च तृतीये स्थितः, चतुर्थे च स्कन्द एव स्थितः। पञ्चमे च शेषवासुकितक्षकाः महानागाः स्थिताः। एवं सुराः विघ्नविनाशाय जर्जरे स्थापिताः। ब्रह्मा स्वयं तु रङ्गपीठस्य मध्ये प्रतिष्ठितः। रङ्गमध्ये तु इष्ट्यर्थं पुष्पमोक्षणं क्रियते। ये च यक्षगुह्यकपन्नगाः पातालवासिनः, ते अधस्तात् रङ्गपीठस्य रक्षणे नियोजिताः। इन्द्रस्तु नायकं रक्षति, सरस्वती च नायिकां रक्षति। अथ ओङ्कारः विदूषकं रक्षति। हरस्तु शेषाः प्रकृती रक्षति। यानि एतानि दैवतानि इह रक्षणे नियुक्तानि, एतान्येव अधिदैवानि भविष्यति' इति सः उवाच।।८८-९८।।

अभिनव-भारती

नागमुख्याविति। अनन्तगुलिकौ। द्वारपत्रं कवाटात्मकम्। द्वारबहुत्वाच्च बहुवचनम्। देहल्यामिति। द्वाराधस्तनकाष्ठे। तस्येति। शूलमिति। एतेन प्रक्रान्तद्वारमेव परामृष्टम्। तेनोर्ध्वकाष्ठे उत्सङ्गशब्दवाच्ये त्रिशूलमित्यर्थः। पार्श्वे स्वयमिति। राजादेस्तत्स्थानमित्युक्तम्। चकारात् स्वदिशि अंशेनाऽवस्थानमनुस्मृतम् । विद्युदिति वज्रायुधरूपा। स्तम्भेष्वपि चतुर्षु यथाक्रमं तद्भूतादयः।

१. शिरःपार्श्वे ततो
२. भगवान्
३. इत्यर्थं
४. विनियोजिताः।
५. तु।
६. अथोङ्कारः।
७. एतेषामधिदेवास्तु।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ते च नाट्यतत्त्वविदः। अत एव विघ्नैः सह ये (तें) नयेन मिलिता इति द्रष्टव्यम्। एतेन सिद्धिविघातका भेदाख्येनाऽप्युपायेन दुर्बलीकर्तव्या इति सूचितम्। प्रतिष्ठित इति। सदैव सन्निहितो वास्तुमध्य इत्यर्थः। कवेश्च सन्निधानं सूचितम्।

अधस्तादिति। येन सुरङ्गाखननादिविघ्नकरणं निवार्यत इत्यर्थः। प्रधानपात्राणि पृथग् रक्षणीयानीत्याह–नायकमिति। हास्यशृङ्गाराङ्गत्वाद् विदूषकमित्युक्तम्। अत एव दशरूपकप्रयोगसूचनमेतत्, समवकारे विदूषकाभावात्। हर इति, बहुमूर्तिप्रथमत्वात्। देवता एव दैवतम् ।।८८-९८।।

तात्पर्य-दीपिका

भावार्थ और व्याख्या–यमराज और काल की द्वार-शालाओं, द्वार-कक्षों की रक्षा करने के लिए नियुक्त किये गये। द्वारों के कपाटों की रक्षा के लिए अनन्त और गुलिक नामक प्रधान नागराज प्रतिष्ठित किये गए। आज भी नागपंचमी आदि अवसरों पर नागों के चित्र दरवाजों पर अंकित किये जाते हैं।

देहली (द्वार की चौखट) की रक्षा के लिए यमदण्ड और उसके ऊपर त्रिशूल स्थापित किया गया। यहां द्वार की चौखट का तात्पर्य मुख्य द्वार की चौखट से है। जिसे 'देहली' की संज्ञा है, और उसके ऊपर की और अवस्थित लकड़ी को उत्संग। मुख्य द्वार पर दो द्वारपाल नियुक्त किए गए–नियति और मृत्यु। रङ्गपीठ (रंगमंच) के पार्श्व (पास) में देवराज इन्द्र स्वयम् उपस्थित हुए। मत्तवारणी की रक्षा के लिए दैत्यों की संहारकारिणी विद्युत् को स्थापित किया गया, क्योंकि वह इन्द्र का वज्रायुध है। (रङ्गपीठ के पास उसके प्रमाण की मत्तवारणी बनाने का विधान है (द्र.ना.शा. २।६२-६७)। शब्दस्तोममहानिधि में मत्तवारण शब्द उपलब्ध है, जिसका अर्थ वरामदा किया गया है।) मत्तवारणी के चार स्तम्भों में उनकी रक्षा के लिए यथाक्रम महाबली भूत, यक्ष, पिशाच और गुह्यकों की स्थापना की गयी। वे सभी नाट्यशास्त्र के तत्त्वज्ञ थे। वे विघ्नकारी तत्त्वों में भेदनीति का प्रयोग कर उनको कमजोर कर सकते थे। अत एव वे वहां नियुक्त किए गये थे।

जर्जर –ध्वजदण्ड की रक्षा के लिए उसके ऊपर इन्द्रायुध वज्र प्रतिष्ठित किया गया, जो दैत्यों का विनाशक था। उसके पांच पर्वों (गांठों) की रक्षा के लिए अपरिमित तेजस्वी देवों की नियुक्त की गयी, जिनमें शिखर से लेकर अन्तिम पर्व तक यथाक्रम (१) ब्रह्मदेव, (२) शंकर, (३) भगवान् विष्णु, (४) कुमार कार्तिकेय और (५) शेष-वासुकि और तक्षक नागराज स्थापित किये गए। इस प्रकार विघ्न दूर करने के लिए उन पांच पर्वों पर यथाक्रम दिव्ययोनि के जीव नियुक्त किये गए।

रङ्गपीठ के मध्य में सदा-सर्वदा के लिए ब्रह्मदेव को नियुक्त किया गया। अत एव रङ्गमंच के मध्य में उनकी इष्टि अर्थात् पूजा के लिए पुष्प-वर्षा की जाती है।

पाताललोक के निवासी जो यक्ष, गुह्यक और पन्नग योनि के जीव थे, उन्हें रंगमंच के नीचे नियुक्त किया गया, जिससे सुरंग-खनन आदि विघ्नों से उसकी रक्षा की जा सके।

नाट्यप्रयोग के प्रधान पात्रों की रक्षा पृथक् रूप से की जानी चाहिए। अत एव

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कहते हैं–) देवराज इन्द्र नायक की रक्षा करते हैं और वाग्देवी सरस्वती नायिका की। ओंकार विदूषक की रक्षा करते हैं।

शंकर अन्य सभी पात्रों की रक्षा करते हैं (वह हास्य और शृंगार रस का उपयोगी पात्र है। 'समवकार'–रूपक में विदूषक नहीं रहता। इस प्रकार दश रूपकों के नाट्यप्रयोग की सूचना दी गयी है।)

इस प्रकार नाट्यमण्डप की रक्षा के लिए विभिन्न स्थानों पर नियुक्ति करने के अनन्तर) ब्रह्मदेव ने यह कहा कि जिन देवताओं को जिन-जिन स्थानों पर रक्षा के लिए नियुक्त किया गया है, वे देवता ही उन-उन स्थानों के अधिष्ठाता देवता होंगे।।८८-९८।।

एतस्मिन्नन्तरे देवैः सर्वैरुक्तः पितामहः ।
साम्ना तावदिमे विघ्नाः स्थाप्यन्तां वचसा त्वया ।।९९।।
पूर्वं साम प्रयोक्तव्यं द्वितीयं दानमेव च ।
तयोरुपरि भेदस्तु ततो दण्डः प्रयुज्यते ।।१००।।

अन्वयः– एतस्मिन् अन्तरे पितामहः सर्वैः देवैः उक्तः–'त्वया तावत् इमे विघ्नाः साम्ना वचसा स्थाप्यन्ताम्। पूर्वं साम प्रयोक्तव्यम्, द्वितीयं दानमेव च प्रयोक्तव्यम्। तयोः उपरि तु भेदः प्रयुज्यते, ततः दण्डः प्रयुज्यते।।९९-१००।।

अभिनव-भारती

अथ नाट्यतत्त्वजाते तन्निरूपणार्थमुपक्रमते–एतस्मिन्निति। नाऽशक्तस्यैव सामाऽङ्गीकरोति दुर्जन इति पूर्वं रक्षाकरणम्। इत्युक्तद्वय (सर्वैरुक्त) इति। कविरनुविधेयवचनो भवतीति दर्शयति। सामादिप्रयोगे तावच्छब्दसूचितं क्रमं स्फुटयति–पूर्वं सामेत्यादि। तत इति। सर्वोपायप्रतिहताविति यावत्।।९९-१००।।

तात्पर्य-दीपिका

भावार्थ– इसी बीच में सभी देवों नें पितामह ब्रह्मदेव से कहा–'भगवन् ! आप विघ्नकारी तत्त्वों को साम (सांत्वनापूर्ण) वचनों से शान्त करें। क्योंकि चार उपायों में सर्वप्रथम सामनीति का और अनंतर दान-नीति का प्रयोग करना चाहिए। उन दोनों उपायों के पश्चात् दण्डनीति के प्रयोग का विधान है।।९९-१००।।

व्याख्या–अब नाट्यतत्त्वों के समूह में उसके निरूपण का उपक्रम किया जा रहा है। चौरासीवे पद्य से अठ्ठानवेवे पद्य तक नाट्यमण्डप की रक्षा का विधान इसलिये किया गया है कि दुर्जन व्यक्ति दुर्बल व्यक्ति की सामनीति को नहीं समझता। अनन्तर देवताओं नें साम-दान-भेद-दण्ड-उपाय चतुष्टय में पितामह ब्रह्मदेव से सामनीति के प्रयोग का अनुरोध किया। क्योंकि इन उपायों का यथाक्रम अवलम्बन करते हुए जब सभी उपाय निष्फल होते हैं, तब अन्त में दण्डनीति का विधान है।।९९।।१००।।

देवानां वचनं श्रुत्वा ब्रह्मा विघ्नानुवाच[१] ह ।
कस्माद् भवन्तो नाट्यस्य विनाशाय समुत्थिताः[२] ।।१०१।।
ब्रह्मणो वचनं श्रुत्वा विरूपाक्षोऽब्रवीद्वचः ।
दैत्यैर्विघ्नगणैः सार्धं सामपूर्वमिदं ततः[३] ।।१०२।।

१. वचनमब्रवीत् ।
२. अलं वो मन्युना दैत्या विषादं त्यजतानघाः, विनाशार्थं समुपस्थिताः।
३. वचः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

योऽयं भगवता सृष्टो नाट्यवेदः सुरेच्छया।
प्रत्यादेशोऽयमस्माकं सुरार्थं भवता कृतः ।।१०३।।
तन्नैतदेवं कर्तव्यं त्वया लोकपितामह!।
यथा देवास्तथा दैत्यास्त्वत्तः सर्वे[1] विनिर्गताः ।।१०४।।

अन्वय–ब्रह्मा देवानां वचनं श्रुत्वा विघ्नान् उवाच ह–'भवन्तः नाट्यस्य विनाशाय कस्मात् समुपस्थिताः?' ततः ब्रह्मणः वचनं श्रुत्वा दैत्यैः विघ्नगणैः सार्द्धं विरूपाक्षः सामपूर्वम् इदं वचः अब्रवीत्–'भगवता सुरेच्छया योऽयं नाट्यवेदः सृष्टः, भवता सुरार्थम् अस्माकम् अयं प्रत्यादेशः कृतः। लोकपितामह! त्वया एवं तत् एतम् न कर्तव्यम्। त्वन्तः यथा देवाः तथा सर्वे दैत्याः विनिर्गताः।।१०१-१०४।।

अभिनव-भारती

तत्र ज्ञाताभिप्रायः प्रतिसमाधातुं सुशक इत्यभिप्रायेणाह देवानामिति। सुरार्थमित्यस्यैव दाढर्यायोक्तं सुरेच्छयेति। प्रत्यादेश इति खलीकार इत्यर्थः। भवतेति। यस्याऽनुचितमेतदित्यर्थः। अनौचित्यमेव लोकपितामहेत्यामन्त्रणेनाह। तदेव पितामहत्वं दर्शयति–यथेति। आ(त्मनोभ) वा देवा दैत्याश्चेत्याह–सर्व इति।।१०१-१०४।।

तात्पर्य-दीपिका

भावार्थ–देवताओं की बात सुनकर ब्रह्मदेव नें उन विघ्नकारी तत्त्वों से कहा–''आप लोग इस नाट्यप्रयोग का विध्वंस करने के लिये क्यों उठ खड़े हो गए?'' अनन्तर ब्रह्मदेव की बात सुनकर दैत्यों और विघ्नकारी तत्त्वों के साथ (उनके प्रतिनिधि के रूप में) विरूपाक्ष ने सामवचनों का प्रयोग इस प्रकार किया–'आपने देवों की इच्छा से जो इस नाट्यवेद की सृष्टि की है, देवताओं के लिये वह आपने हमारा तिरस्कार किया है। लोकों के (समस्त सृष्टि के) पितामह ब्रह्मदेव जी! इसप्रकार आपको यह नहीं करना चाहिए। क्योंकि जिस प्रकार आपसे देवताओं का अवतरण हुआ है, उसी प्रकार सभी दैत्यों का भी हुआ है।।१०१-१०४।।

व्याख्या–यहां पर **'देवानां वचनं श्रुत्वा'** का अर्थ केवल देवताओं का वचन सुनकर' यह नहीं है, अपितु 'उनके अभिप्राय को समझकर' यह है। क्योंकि किसी के अभिप्राय को समझकर ही, उसका समाधान करना सम्भव होता है। तदनुसार ब्रह्मदेव विघ्नकारी तत्त्वों से प्रश्न कर रहे हैं। विरूपाक्ष के उत्तर में **'सुरेच्छया'** का तात्पर्य यद्यपि सुरार्थम् (देवताओं के लिए) यही है, तथापि उस पर जोर देने के लिए यह प्रश्न है कि आपने केवल देवों की इच्छा का ध्यान रखा, असुरों की नहीं। लोकपितामह सम्बोधन की सार्थकता यह है कि आप सम्पूर्ण विश्व के सर्जक हैं। आपको सब पर समान दृष्टि रखनी चाहिए। केवल देवताओं के प्रति पक्षपातपूर्ण दृष्टि रखकर तदनुसार आचरण आप जैसे लोगों के लिए अनुचित है। 'नाट्यप्रयोग में दैत्यों के पराभव का चित्रण हमारा तिरस्कार है, जो आपके खलत्व को घोषित करता है', इस अर्थ का व्यञ्जक **प्रत्यादेशोऽयमस्माकं सुरार्थं भवता कृतः** यह पद्यार्थ है। 'लोकपितामह' सम्बोधन का स्पष्टीकरण ही इस पद्यार्थ में है–

---

१. पूर्वविनिर्गताः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

यथा देवास्तथा दैत्यास्त्वत्तः सर्वे विनिर्गताः ।।१०१-१०४।।
विघ्ना[1]नां वचनं श्रुत्वा ब्रह्मा वचनमब्रवीत् ।
अलं वो मन्युना दैत्या! विषादस्त्यज्यतामयम्[2] ।।१०५।।

अन्वयः–ब्रह्मा विघ्नानां वचनं श्रुत्वा वचनम् अब्रवीत्– 'दैत्याः! वः मन्युना अलम्, अयं विषादः त्यज्यताम्।।१०५।।

अभिनव-भारती

वचनमिति। सुपरिहरमेतत्। नाऽत्र भूयान् प्रयास इत्येकवचनेन दर्शयति। अत एव सिद्धवदुपक्रमते–अलं वो इति। मिथ्याज्ञानगृहीतसर्पत्रासवद्यो भ्रान्तिमात्रकृत इत्यर्थः। दैत्यानामशुभकारिता लोकप्रसिद्धा। कुरु (कृत) रङ्गविभागश्चैषां चेष्टितमस्तु। देवानां तद्विपर्यय इति नाट्यस्य न तात्पर्यं येन भवतां मन्युः।।१०५।।

तात्पर्य-दीपिका

भावार्थ–ब्रह्मदेव ने विघ्नकारी तत्त्वों की बात सुनकर यह कहा– 'दैत्यों! आप क्रोध न करें। इस विषाद का परित्याग करें।'

व्याख्या– ब्रह्मा वचनमब्रवीत् इस चरण में 'वचन' शब्द का एक वचन में प्रयोग यह सूचित कर रहा है कि विरूपाक्ष के क्रोध का परिहार करना सरल है, उसमें विशेष परिश्रम की आवश्यकता नहीं है। अत एव अलं वो इत्यादि उत्तरार्द्ध का उपक्रम सिद्ध- वचनसदृश है। अलं वो मन्युना इत्यादि का तात्पर्य यह है कि आपका यह क्रोध भ्रमजन्य है। जिस प्रकार कोई रस्सी को देखकर और उसे सर्प समझ कर फिर घबड़ा जाना है, उसीप्रकार आपका यह क्रोध है। दैत्य सदा अशुभ कार्य करते हैं, यह लोक प्रसिद्ध है। नाट्य के प्रयोग में उनकी विध्वंसकारिता को और देवों की रचनात्मकता को चित्रित करना इतना ही मात्र इस नाट्य-प्रयोग का तात्पर्य नहीं है, जिससे आप क्रुद्ध हो रहे हैं। इसका तात्पर्य इससे भिन्न है।।१०५।।

भवतां देवतानां च शुभाशुभविकल्पकः[3] ।
कर्मभावान्वयापेक्षी[4] नाट्यवेदो मया कृतः ।।१०६।।

अन्वयः–मया भवतां देवतानां च शुभाशुभविकल्पकः कर्मभावान्वयापेक्षी नाट्यवेदः कृतः।।१०६।।

अभिनव-भारती

कि तर्हीत्याह। शुभकारिणः शुभं फलमशुभकारिणोऽशुभं फलमित्येतावदेवास्माकं प्रतिसाक्षात्कारकल्पे नाट्ये प्रदर्शनीयम्। न तत्र देवेषु दैत्येषु वा कश्चिद् भरः। अत एव भवतामपि धर्मादौ यः सदुपायः, सोऽपि शुभविपाकत्वेनैव दर्शितः। अत एव शुभग्रहणमेकतरपक्षशैथिल्यदर्शनाय दैत्यसम्बन्धनार्थं प्रथममुपात्तम्। शुभमशुभ च धर्माधर्मरूपं सुखदुःखफलत्वेन विभेदेन कल्पयत्यध्यवसाययति नाट्यवेदः। कीदृक्?कर्मभावान्वयापेक्षीति। तद्यथा–धर्मो

---

१. देवानां, विरुपाक्षवचः।
२. विषादं त्यजमानघाः।
३. विकल्पकैः।
४. पेक्षो।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दानं स्नानमित्यादिः। अधर्मो हिंसा स्तेयमित्यादिः। भाव आशयः स्त्री(स्व) प्रसङ्गोदिता स्वार्थतापरार्थताद्यभिसन्धिरित्यादिः। अन्वयोऽभिजनः आर्यावर्तादिर्ब्राह्मण्यश्चेति। तानपेक्षते सहकारितया।

एतदुक्तं भवति–अस्मिन् देशेऽस्मिन् काले ईदृशेन कर्मणा यः शुभमशुभं चाऽर्जयति, स एवंविधफलभागी भवतीति न तावदिहोपदिश्यते। विकल्पक इति द्वौ णिचौ।।१०६।।

तात्पर्य-दीपिका

भावार्थ– मैंने आप(दैत्यों) के और देवताओं के शुभ-अशुभ कर्मों के शुभाशुभ-फल के द्योतक धर्म-अधर्म आदि कर्म-भाव-वर्ण-कुल आदि के सहकारी रूप में निरूपण करनेवाले नाट्यवेद की रचना की है।।१०६।।

व्याख्या– प्रत्येक नाट्य-प्रयोग साक्षात्कार के समान होता है। उस प्रयोग के मंचनमात्र का यह उद्देश्य होता है कि जो शुभ कार्य करता है, वह शुभ फल प्राप्त करता है और जो अशुभ कार्य करता है वह अशुभ फल प्राप्त करता है। दैत्यों अथवा देवताओं किसी एक के प्रति पक्षपात करना हमारा उद्देश्य नहीं है। अत एव आप दैत्यों के द्वारा भी धर्म आदि के विषय में जिस सत्य उपाय को प्रदर्शित किया गया है, उसका परिणाम भी शुभ ही प्रदर्शित किया गया है। इसी दृष्टि से **नाट्यवेद** का प्रथम विशेषण पूर्वार्द्ध है, जिसमें 'शुभाशुभविकल्पकः' पद के अन्तर्गत 'शुभ' पद का सम्बन्ध प्रथम 'भवतां' के साथ है, जो यह किसी एक पक्ष के प्रति आग्रह को नहीं दर्शाता। **शुभाशुभविकल्पकः** का समासविग्रह इस प्रकार होगा– **'शुभं धर्मरूपं सुख-फलं चेत् विभेदेन कल्पयति, अध्यवसाययति अशुभं च** अधर्मरूपं दुःखफलत्वेन विभेदेन कल्पयतीति शुभाशुभविकल्पकः।' 'विकल्पकः' यहां पर दो णिच् प्रत्यय प्रयुक्त हैं। (प्र० अभिनव भारती– 'विकल्पक इति द्वौ णिचौ।')

नाट्यवेद का दूसरा विशेषण है–**कर्मभावान्वयापेसी**। इसका समासविग्रह इसप्रकार होगा–कर्माणि भावाः अन्वयश्चेति कर्मभावान्वयाः, तान् अपेक्षतें इति कर्मभावान्वयापेक्षी।" कर्म का तात्पर्य धर्म-अधर्म से है। अभिनवगुप्तपादाचार्य अनुभाव (चेष्टा) की दृष्टि से स्नान-दानादि को धर्म-कर्म के अन्तर्गत एवं चोरी-हिंसा आदि को अधर्म-कर्म के अन्तर्गत समाविष्ट करते हैं। 'भाव' का अर्थ स्वार्थ-परार्थ आदि भाव हैं। 'अन्वय' का अर्थ वंश और उसके वर्ण-जाति और तदनुरूप कर्म से है। नाट्यवेद सहकारी कारण के रूप में इन सबकी अपेक्षा करता है। इसका निष्कर्ष यह है कि नाट्यवेद प्रेक्षकों को केवल यह उपदेश नहीं देता कि वह क्या करे अथवा क्या न करे। वह प्रेक्षकों के सामने अपने नाट्य प्रयोगों के माध्यम से यह प्रत्यक्ष कराता है कि विशिष्ट देश अथव विशिष्ट काल में विशिष्ट कर्म द्वारा जो शुभ अथवा अशुभ फल अर्जित किया जाता है, उसका फल उसे अवश्य भोगना पड़ता है। **अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। प्रारब्धकर्मणां भोगादेव क्षयः।** संचित-क्रियभाग और प्रारब्ध कर्मों में परमेश्वर की कृपा से संचित और क्रियमाण कर्मों का क्षय संभव है। प्रारब्ध कर्मों को अवश्य भोगना पड़ता है। अब प्रेक्षक को यह निर्णय करना है कि उसे क्या करना चाहिए।।१०६।।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नैकान्ततोऽत्र भवतां देवानां चा[१]नुभावनम्।
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ।।१०७।।

अन्वयः– अत्र एकान्ततः भवतां देवानां च अनुभावनं न, नाट्यम् अस्य सर्वस्य त्रैलोक्यस्य भावानुकीर्तनम् ।।१०७।।

अभिनव-भारती

ननु चैवमप्यस्मत्पृष्ठे किमेतद् योजितमित्याह–नैकान्तत इति। अयं भावः– न युष्मत्पृष्ठे केनचिदेतद् योजितम्। देवासुरस्य बहिर्यथास्वस्थमवस्थानम्। अत्रेति नाट्यवेदे। न देवासुराणामेकान्तेनाऽनुभावनम्। नैव तेऽनुभाव्यन्ते केनचित् प्रकारेण।

तथाहि– तेषु न तत्त्वेन धीः। न सादृश्येन यमलकवत्। न भ्रान्तत्वेन रूप्यस्मृतिपूर्वकशुक्तिरूप्यवत्। नाऽऽरोपेण सम्यग्ज्ञानबाधानन्तरमिथ्याज्ञान-रूपेण मुखचन्द्र इतिवत्। न तदध्यवसायेन गौर्वाहीकवत्। नोत्प्रेक्ष्यमाणत्वेन चन्द्रमुखवत्। न तत्प्रतिकृतित्वेन चित्रपुस्तवत्। न तदनुकारेण गुरुशिष्यव्याख्या-हेवाकवत्। न तात्कालिकनिर्माणेनेन्द्रजालवत्। न युक्तिविरचिततदाभासतया हस्तलाघवादिमायावत्। सर्वेष्वेतेषु पक्षेष्वसाधारणतया द्रष्टुरौदासीन्ये रसास्वादायोगात्। कवेश्च नियतवर्णनीयनिश्चितत्वे काव्यस्यैवाऽसम्पत्तेरनौ-चित्यावर्जनयोगात्। लौकिकमिथुनदृशीव सांसारिकहर्षक्रोधान्वयितापत्तेरुभय-दर्शनाकुलतया मुख्यदृष्टौ प्रयोक्तृदृष्टौ तद्धि सम्पत्त्य(द्विसंवित्त्य) भावात्।

किं तर्ह्येतत्? आह–त्रैलोक्यस्येति। एतदुक्तं भवति–एतादृश(एतादृगभिः)–तै रामादयो न कदाचन प्रमाणपथमवतार्यन्ते यदाऽऽगमेन वर्ण्यन्ते। तदा तद्विशेषबुद्धिः यद्यपि रामायणप्रायादेकस्मात् महावाक्यादुल्लसति, तथापि वर्तमानतयैव विशेषाणां सम्भाव्यमानार्थक्रियासामर्थ्यात्मकसालक्षण्य-पर्यवसानात्। न च तेषां वर्तमानतेत्युपगता तावद् विशेषबुद्धिः। काव्येष्वपि हृदयमेव एव (हृदय एव) तावत् साधारणीभावो विभावादीनां जाता (तः)। तत्रापि कथामात्रे साधारणीभावः सम्भवति यद्यपि, तथापि 'एवं ये कुर्वन्ति तेषामेतद् भवति' इति वाक्यवद् रञ्जनातिशयाभावान्न चित्तवृत्ते (त्ति) र्निर्णयगता भवति।

काव्ये तु गुणालङ्कारमनोहरशब्दार्थशरीरे लोकोत्तररसप्राणके हृदयसंवादवशात् निमग्नाकारिका तावद् भवति चित्तवृत्तिः। किन्तु सर्वस्य प्रत्यक्षसाक्षात्कारकल्पा तत्र न धीरुदेति।

नाट्ये तु परमार्थिकं किञ्चिदद्य मे कृत्यं भविष्यतीत्येवंभूताभिसन्धिसंस्कारा-भावात् सर्वपरिषत्साधारणप्रमोदसारापर्यन्तविरसना (समा) दरणीय-लोकोत्तरदर्शनश्रवणयोगी भविष्यामीत्यभिसन्धिसंस्कारादुचितगीतातोद्य-चर्वणाविस्मृतसांसारिकभावतया विमलमुकुरकल्पीभूतनिजहृदयः, सूच्याद्यभिनयावलोकनोद्भिन्नप्रमोदशोकादितन्मयीभावः, पाठ्याकर्णन-

१. चापि भावनम्, चात्र भावनम्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पात्रान्तरप्रवेशवशात् समुत्पन्ने देशकालविशेषावेशानालिङ्गिते सम्यङ्मिथ्या-संशयसम्भावनादिज्ञानविज्ञेयत्वपरामर्शानास्पदे, रामरावणादिविषयाध्यवसाये, तत्संस्कारानुवृत्तिकारणभूतसहचरहृद्यवस्तुरूपगीतातोद्यप्रमदानुभवसंस्कारसूचितसमनुगततदुक्तरूपरामाध्यवसायसंस्कार एव भवन् पञ्चषैर्दिवसैः सचमत्कारतदीयचरितमध्यप्रविष्टस्वात्मरूपमतिः स्वात्मद्वारेण विश्वं तथा पश्यन् प्रत्येकं सामाजिको देशकालविशेषणापरामर्शेन एवंकारिणामिदमिति लीढा (लिङ्ग)त्मकविधिसमर्पितं संविज्जातीयमेव संविद्विशेषरव्यञ्जकप्राणवल्लभाप्रतिमरसास्वादसहचररम्यगीतातोद्यादिसंस्काररसा(नुभव) वशेन हृदयाभ्यन्तरनिखातं तत एवोत्पुङ्खशतैरपि म्लानिमात्रमप्यभजमानं भजंस्तत्त-च्छुभाशुभप्रेप्साजिहासासततस्यूतवृत्तित्वादेव शुभमाचरत्यशुभं समुज्झति। इदानीमुपायसंवेदनालाभात् तदिदमनुकीर्तनमनुव्यवसायविशेषो नाट्या-परपर्यायः। नानुकार इति भ्रमितव्यम्। अनेन भाण्डेन राजपुत्रस्याऽन्यस्य वानुकृतेऽन्या (कृतावन्या) दिबुद्धेरभावात्। तद्धि विका(क)रणमिति प्रसिद्धं हासमात्रफलं मध्यस्थानाम्। यदभिप्रायेण मुनिर्वक्ष्यति–

परचेष्टानुकरणाद्धासः समुपजायते (अ. ७-१०) इति।।

तत्पक्षीयाणान्तु तदेव द्वेषासूयानि(नु)वृत्त्यादिफलम् । तद्वद्ध्यैव हि दैत्यानां हृदयक्षोभः 'एवम्भूता वयमुपहासभाजनम्' इति। उपहास्यताभीरवश्च निवर्तन्ते ततः, न तूपदेशेन।

नन्वेवं तावता नियतानुकारो माभूत्। अनुकारेण तु किमपराद्धम्? न किञ्चिदसम्भवत्वाद् ऋते। अनुकार इति हि सदृशकरणम्। तत् कस्य। न तावद्रमादेः, तस्याऽननुकार्यत्वात्। एतेन प्रमदादिविभावानामनुकरणं पराकृतम्।

न चित्तवृतीनां शोकक्रोधादिरूपाणाम्। न हि नटो रामसदृशं स्वात्मनः शोकं करोति, सर्वथैव तस्य तत्राऽभावात्, भावे वाऽननुकारत्वात्। न चान्यद् वस्त्वस्ति यच्छोकेन सदृशं स्यात्। अनुभावांस्तु करोति, किन्तु सजातीयानेव, न तु तत्सदृशान्। साधारणरूपस्य कः केन सादृश्यार्थः? त्रैलोक्यतर्तिनः सदृशत्वन्तु न विशेषात्मना यौगपद्येनोपपद्यते। कदाचित् क्रमेण नियत एवाऽनुकृतः स्यात्। सामान्यात्मकत्वे कोऽनुकारार्थः? तस्मादनियतानुकारो नाट्यमित्यपि न भ्रमितव्यम्। अस्मदुपाध्यायकृते 'काव्यकौतुके'ऽप्ययमेवाऽभिप्रायो मन्तव्यः। न त्वनियतानुकारोऽपि।

तेनाऽनुव्यवसायवत् विशेषविषयीकार्यं नाट्यम् । तथा चाऽऽहार्यविशेषादिना निवृत्ते तद्देशकालचैत्रमैत्रादिनटविशेषप्रत्यक्षाभिमाने विशेषलेशोपक्रमेण च विना प्रत्यक्षाप्रवृत्तेरायाते रामादिशब्दस्याऽत्रोपयोगात् प्रसिद्धतदर्थतयाऽऽदरणीयचरितवाचकस्याऽसम्भावनामात्रनिराकरणेनाऽनुव्यवसायस्य प्रत्यक्षकल्पनाट्ये हृद्यगीताद्यनुस्यूततया चमत्कारस्थानत्वाद् हृदयानुप्रवेशयोग्यत्वमभिनयचतुष्टयेन स्वरूपप्रच्छादनं, प्रस्तावनादिना नटज्ञानजसंस्कारसाचिव्यं, तेन रञ्जकसामग्रीमध्यानुप्रविष्टेन प्रच्छादितस्वस्वभावेन प्राक्प्रवृत्तलौकिकप्रत्यक्षानुमानादिजनितसंस्कारसहायेन सहृदयसंस्कारसचिवेन

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हृदयसंवादतन्मयीभावनासहकारिणा प्रयोक्त्रा दृश्यमानेन योऽनुव्यवसायो जन्यते सुखदुःखाद्याकारतत्तच्चित्तवृत्तिरूपरूषितनिजसंविदानन्दप्रकाशमयः अत एव विचित्रो रसनास्वादनचमत्कारचवर्णनिर्वेशभोगाद्यपरपर्यायः तत्र यदवभासते वस्तु तन्नाट्यम्। तच्च ज्ञानाकारमात्रमारोपितं स्वरूपं सामान्यात्मकं तत्कालनिर्मितरूपं चान्यद् वा किञ्चिदस्तु। नाऽत्राऽप्रस्तुतलेखनेनाऽऽत्मनो दर्शनान्तरकथापरिचयप्रकटनफलेन प्रकृतवस्तुनिरूपणविघ्नमाचरन्तः सहृदयान्खेदयामः।

तस्मादनुव्यवसायात्मकं कीर्तनं रूपितविकल्पसंवेदनं नाट्यम्, तद्वेदनवेद्यत्वात्। न त्यनुकरणरूपम्। यदि त्वेवं मुख्यलौकिककरणानुसारितयाऽनुकरणमित्युच्यते तन्न कश्चिद् दोपः। स्थिते वस्तुतो भेदे शब्दप्रवृत्तेरविवादास्पदत्वात्। एतच्च यथावसरं वितनिष्यत इत्यास्तां तावत्।

यतश्चेदं नाऽनुकरणं ततो यत्कैश्चिच्चोदितं तदनवकाशम्–'न च गीतवाद्ययुक्तः सर्वावस्थासु कश्चिदनुकार्यः' इति न त्वनुकार्यत्वेन गीतादय इत्युक्तम्। परिहारोऽपि य उक्तः 'आसनगमनस्नानस्वापप्रतिबोधभोजनाद्यासु गीतवाद्यं लोकेचेष्टास्वतिप्रथितम्' इत्यादि, तदप्यनुपपन्नम्। न हि गमनादौ तद्ध्रुवातालादिरूपेण गीतादि लोकेऽस्ति मङ्गलमात्रत्वाद् ऋते। गायनवादनादिष्वपि चाऽनुकारवुद्ध्यापत्तेरित्यलम्। ।।१०७।।

तात्पर्य-दीपिका

भावार्थ–इस नाट्यवेद में ऐकान्तिक (एकपक्षीय) दृष्टि से न तो आप (असुरों) के और न देवों के क्रियाकलापों की अभिनयात्मक नाटकीय प्रस्तुति की गयी है। नाट्य-प्रयोग (एकपक्षीय प्रस्तुति न होकर) प्रत्यक्षगोचर सम्पूर्ण त्रिभुवन (स्वर्ग-मृत्यु-पाताल लोकों) के क्रिया-कलापों की अनुकरणात्मक प्रस्तुति है।।१०७।।

व्याख्या–असुरों के प्रतिनिधि के रूप में उपस्थित विरूपाक्ष के योऽयं भगवता सृष्टः इत्यादि आरोप का ब्रह्मदेव द्वारा प्रदत्त यह प्रत्युत्तर है। विरूपाक्ष का यह प्रश्न था कि केवल हमें ही लक्ष्य कर इस नाट्यप्रयोग का मञ्चन क्यों किया गया? जिसका उत्तर है–नैकान्ततः, केवल आपको (असुरों को) ही लक्षित कर यह नाट्यनुकरण प्रस्तुत नहीं किया गया। साथ ही देवों को मात्र लक्ष्य कर यह नाट्य प्रस्तुति नहीं है, और न कोई ऐसा उद्देश्य ही है। आप सब का यथार्थ चित्रण इस नाट्य प्रयोग में किया गया है।

कवि क्रान्तदर्शी होता है और उसके द्वारा विरचित रूपक और उपरूपक दृश्यकाव्य के अन्तर्गत आते हैं। वह नियमों में बंधकर एकपक्षीय चित्रण नहीं कर सकता। ऐसा करने से उसके द्वारा की गयी रचना का काव्यस्वरूप ही समाप्त हो होगा, क्योंकि ऐसा करना उसके लिए अनुचित है। ज्ञान अनेकविध होते हैं–(१)सादृश्य-ज्ञान, जैसे जुड़वां वच्चे।(२)भ्रान्ति-ज्ञान, जैसे सीप में चांदी का ज्ञान, (३) आरोपित ज्ञान, जैसे मुखचन्द्र–मुख पर चन्द्रमा का आरोप। (४) लाक्षणिक ज्ञान–जैसे 'गौर्वाहीकः'। (५) उत्प्रेक्षित ज्ञान–जैसे मुख में चन्द्र की संभावना।(६) प्रतिकृति–जैसे पुस्तक का चित्र, (७) तात्कालिक निर्माण, जैसे इन्द्रजाल (जादू),

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(८) हस्तकौशल–हाथ की कारीगरी। ये जितने भी प्रकार के ज्ञान हैं, उनमें दर्शक उदासीन रहता है। वह उससे रसास्वाद नहीं कर सकता। कवि का उद्देश्य अपनी कविता से रससृष्टि होता है। अतः नाट्य में एकपक्षीय प्रस्तुति नही होती।

त्रैलोक्यस्याऽस्य सर्वस्य इत्यादि–उक्त सभी प्रकार के ज्ञान राम आदि को उसप्रकार प्रस्तुत नहीं कर सकते, जैसा कि आगमों में वे चित्रित हैं। यद्यपि पाठक एक वाल्मीकीय रामायण महाकाव्य द्वारा उन पात्रों के स्वरूप की कल्पना कर सकता है। यद्यपि रघुवंशादि श्रव्यकाव्य भी साधारणीकरण द्वारा रसास्वाद कराने में समर्थ हैं, परन्तु वे उसका साक्षात्कार कराने में असमर्थ हैं, वे केवल हृदयंगम ही करा सकते हैं। नाट्य दृश्य होता है। गीत-नृत्य-वाद्य आदि उसके अंग हैं। वह नाट्य प्रत्येक दर्शक को भूतकाल से हटाकर वर्तमानकाल में ले जाता है और उसे रसविभोर कर देता है। वह उस समय समस्त सांसारिक भावों को भुला बैठता है। उस समय उसका हृदय दर्पण के समान निर्मल रहता है। नाट्य-प्रयोग में वह प्रत्यक्षगोचर हर्ष-शोक आदि भावों में तन्मय रहता है। उस समय वह किसी देश विशेष और काल विशेष से प्रभावित नहीं रहता। विशिष्ट ज्ञान के प्रति उसका कोई आग्रह नहीं रहता। नाट्य-प्रयोग में प्रस्तुत पात्रों के चरित्र से वह अपनी तुलना करता है। इतना ही नहीं, उनकी अनुभूति को अपनी अनुभूति समझता है और अशुभ का परित्याग करते हुए शुभाचरण में प्रवृत्त होता है।

साथ ही नाट्य को मात्र अनुकृति नहीं समझना चाहिए। केवल अनुकरण-मात्र उपहास-सृष्टि करता है। 'अनुकरण' का अर्थ यह है कि जैसा है वैसी प्रस्तुति करना। नट किसका अनुसरण करतां है? क्या वह रामादि का अनुकरण कर सकता है?, कदापि नहीं। उसी प्रकार उनमें रहनेवाले शोक-क्रोध आदि भावों का भी वह अनुकरण नहीं कर सकता, क्योंकि वे उसमें नहीं रह सकते। नट केवल उसके (रामादि के) अनुभावों (क्रियाकलापों) का अनुकरण करता है। साथ ही जो अनुभाव सजातीय हैं, उनका अनुकरण कर सकता है, ठीक उनके सदृश का अनुकरण संभव ही नहीं है। अतः समस्त नाट्य सृष्टि त्रिभुवन के क्रियाकलापों का अनुकरण है। वह साधारण रूप सेही संभव है, विशेष रूप से नहीं। अतः आप को यह भ्रम नहीं करना चाहिए कि 'अनियतानुकारो नाट्यम्' यह नाट्य की परिभाषा है। क्योंकि ऐसी स्थिति में अनुकरण का कोई अर्थ ही नहीं है, जो साधारण हो।**अनुव्यवसायवत् विशेष-विषयीकार्यं नाट्यम्**, अभिनवगुप्त पादाचार्य के शब्दों में **नाट्यं भावानुकीर्तनम्** की यही व्याख्या है। आप के गुरु भट्टतौत द्वारा विरचित **काव्य कौतुक** में भी यही आशय है कि अनुकरणमात्र नाट्य नहीं है। जब आहार्य अभिनय अर्थात् वेशभूषा-परिवर्तन आदि के द्वारा नाट्य कथावस्तु के अनुरूप तत्कालीन देश-काल आदि का परिदृश्य खडा किया जाता है और चैत्र-मैत्रादि नटों (अभिनेताओं) को रामादि की भूमिका में मञ्चस्थ किया जाता है, तब दर्शक वर्तमान काल की वास्तविक सत्ता को विस्मृत करता है और भूतकाल में पहुंचकर उसीका प्रत्यक्ष करता है। इसप्रकार नाट्य प्रत्यक्षकल्प है। उसमें हृदयावर्जक नृत्य-गीत और वाद्य का समावेश उसे चमत्कारी बना देता है। उस नाट्य में आंगिक-वाचिक-सात्विक और आहार्य अभिनय द्वारा नट अपने स्वरूप को ढंक देता है।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रस्तावना आदि के द्वारा नट के ज्ञान से उत्पन्न संस्कार उस नाट्य को प्रत्यक्षकल्प बनाने में सहायक होते हैं। उस चित्ताकर्षक सामग्री के बीच प्रयोगकर्ता उपस्थित होता है, जो अपने स्वभाव को ढंककर पहले से प्रवृत्त प्रत्यक्ष-अनुमानादि प्रमाणजन्य संस्कारों की सहायता से सहृदय के साथ इस प्रकार संवाद स्थापित करता है, जिससे सहृदय दर्शक भी उसके साथ तादात्म्य स्थापित करता है। उस प्रयोगकर्त्ता द्वारा सामाजिक में अनुव्यवसाय (निश्चयात्मक ज्ञान) को जन्म दिया जाता है। वह अनुव्यवसाय ऐसा होता है, जो चित्तवृत्ति को तदाकार बना देता है, उनके सुख-दुःख उसके अपने सुख-दुःख होते हैं, उसमें जो संवित्, आनंद और प्रकाश होता है, वह विलक्षण होता है। उस अनुव्यवसाय के अन्य पर्याय हैं–रसन, आस्वादन, चमत्कार, चर्वणा, निर्वेश भोग आदि। उस में जो प्रतीति होती है वही वस्तु नाट्य है। चाहे उसका स्वरूप कुछ भी हो–केवल ज्ञान-स्वरूप हो, आरोपित हो, सामान्य हो, अथवा तात्कालिक हो। इसलिए **नाट्यं भावानुकीर्त्तनम्** इसका अर्थ है अनुव्यवसायात्मक कीर्तन। केवल अनुकरण नाट्य नहीं है। अभिनवगुप्तपादाचार्य का यही आशय है। (द्र० अभिनव भारती)।।१०७।।

क्वचिद् धर्मः क्वचित् क्रीडा क्वचिदर्थः क्वच्छिमः ।
क्वचिद्धास्य क्वचिद् युद्धं क्वचित् कामः क्वचिद् वधः ।।१०८।।
धर्मो धर्मप्रवृत्तानां कामः कामो[1]पसेविनाम् ।
निग्रहो दुर्विनीतानां विनीतानां[2] दमक्रिया ।।१०९।।
क्लीबानां धार्ष्ट्यजन[3]नमुत्साहः शूरमानिनाम् ।
अबु[4]धानां विबोधश्च वैदु[5]ष्यं विदुषामपि ।।११०।।
ईश्वराणां विलासश्च स्थैर्यं दुःखार्दितस्य च ।
अर्थोपजीविनामर्थो धृति[6]रुद्विग्नचेतसाम् ।।१११।।
नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम् ।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ।।११२।।
उत्तमाधममध्यानां नराणां कर्मसंश्रयम् ।
हितोपदेशजननं [7]धृतिक्रीडासुखादिकृत् ।।११३।।
(एतद् रसेषु भावेषु सर्वकर्मक्रियास्वथ ।
सर्वोपदेशजननं नाट्यं लोके भविष्यति ।।)
दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् ।
विश्रान्तिजननं[8] काले नाट्यमेत[9]द् भविष्यति ।।११४।।
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ।
लोकोपदेशजननं नाट्यमेतद् भविष्यति ।।११५।।

---

१. कामार्थ।
२. मत्तानां च।
३. करणम्।
४. अबोधानां।
५. वैदग्ध्यम् ।
६. वृत्ति।
७. नाट्यमेतद् भविष्यति।
८. विश्राम।
९. मया कृतम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अन्वयः—क्वचिद् धर्मः, क्वचित् क्रीडा, क्वचित् अर्थः, क्वचित् शमः, क्वचित् हास्यम्, क्वचित् युद्धम्, क्वचित् कामः, क्वचित् वधः। धर्मप्रवृत्तानां धर्मः, कामोपसेविनां कामः, दुर्विनीतानां निग्रहः, विनीतानां दमक्रिया।

क्लीवानां धार्ष्ट्यजननम्, शूरमानिनाम् उत्साहः, अबुधानां च विबोधः, विदुषाम् अपि वैदुष्यम्।

ईश्वराणां च विलासः, दुःखार्दितस्य च स्थैर्यम्, अर्थोपजीविनाम् अर्थः, उद्विग्न-चेतसां धृतिः।

नानाभावोपसम्पन्नं नानावस्थान्तरात्मकं लोकवृत्तानुकरणम् एतत् नाट्यं मया कृतम्।

उत्तमाधममध्यानां नराणां कर्मसंश्रयं हितोपदेशजननं धृतिक्रीडासुखादिकृत् (एतत् नाट्यं मया कृतम् ।)

रसेषु भावेषु अथ सर्वक्रियासु सर्वोपदेशजननं (एतत् नाट्यं भविष्यति।) एतत् नाट्यं दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनां काले विश्रान्तिजननम् एतत् नाट्यं भविष्यति।

धर्म्यं यशस्यम् आयुष्यं हितं बुद्धिविवर्धनं लोकोपदेशजननं भविष्यति।।

अभिनव-भारती

ननु त्रैलोक्यस्य ये भावास्तेषां यद्यनुकीर्तनं नाट्यं तदेकत्रैव रूपके एकत्रैव चाऽङ्कादौ सर्वमेव दृश्येतेत्याशङ्कानिराकरणपूर्वकं पूर्वप्रयोजनेन सप्रयोजनत्वमुपसंहरति—**क्वचिद्धर्म** इत्यादिना **लोकोपदेशजननं नाट्यमेतद्भविष्यति** इत्यन्तेन श्लोकाष्टकेन। एतच्च कैश्चिद् भिन्नवाक्यतया प्रतिश्लोकं व्याख्यातम्। तच्च पौनरुक्त्याध्याहारपरस्परासङ्गत्यादिदोषोपहतं स्यादित्युपेक्ष्यमेव। तस्मादित्थमत्र योजना—नानाप्रकारैर्भावैः स्थायिव्यभिचारिविभावादिभिरुपसम्पन्नं सर्वतो व्याप्तम्। तेषां च भावादीनां देशकालप्रवृत्त्यवस्थान्तरभिन्नस्वभावत्वात् तदपि नानावस्थात्मकम् । अत एवाहोत्तमाधमेति। एवम्भूतमेतद् भविष्यति। काले विश्रान्तिजननं हितोपदेशजननं च भविष्यतीति सम्बन्धः।

के के नानाप्रकारा भावा इत्याह—**क्वचिद् धर्म** इत्यादि। यथायोगं धर्मादयः शब्दास्तदुचितस्थायिव्यभिचार्यादिसूचकाः। तेन धर्मोऽर्थ इत्युत्साहादिः। क्रीडेति विस्मयादिः। शम इति निर्वेदादिः। हास्यमिति हासादिः। युद्धमिति रौद्रादिः। काम इति रत्यादिः। वध इति क्रोधभयजुगुप्साशोकादिः। अमीभिश्च समुचितव्यभिचार्यनुभावाः स्वीकृताः। क्वचिदिति शब्देन दशरूपकान्यतममुच्यते। त(य)था नाटकाद्यनेकरूपकगतो विशेषस्तथैकं ना(कना)-टकादिविशेषे। को विभागः? एतदुक्तं भवति—किञ्चिद् धर्मप्रधानं रूपकं यथा नाटकम्। प्रकरणं वा क्रीडाप्रधानम्। तथा प्रसिद्धानां यथा भाणः। अर्थप्रधानत्वं प्रकरणादौ। एवं दशरूपकलक्षणानुसारेण सर्वमनुसरणीम्। तथा क्वचिन्नाटके धर्मः प्रधानम् —यथा छलितरामे रामस्याऽश्वमेधयागः। क्वचित् क्रीडा—यथा स्वप्नवासवदत्तायाम्। एवमन्यत्राऽप्यनुसरणीयम्। तथैकत्राऽपि नाटके क्वचिदेशे धर्मः, यथाऽभिज्ञानशाकुन्तले—**अपि नाम कुलपतेरियमसवर्ण-क्षेत्रसम्भवा**

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्यात् (अङ्क-१)। एवं प्रतिनाटकमेकदेशेषु सुलक्षा एव क्रीडादय इति ग्रन्थविस्तरभीरुभिरस्माभिर्न परिवर्णिताः।

नन्ववस्थादेशकालप्रकृतिविशेषसमुचितभावानुकीर्तनमात्रमेव कर्तव्यम्। किं रामाय(दि) रावणेत्यादिसमाश्रयेणेत्याशङ्क्याऽऽह–धर्म इति। चो हेतौ। यस्माल्लोकवृत्तानुसारेण करणं प्रयोगरूपं नाट्यं मया कृतमेतदित्येतस्मात् कारणाद् धर्मप्रवृत्तानां रामयुधिष्ठिरादीनां सम्बन्धित्वेन धर्म उक्तः। निग्रह इति वधः। विनीतानां जितेन्द्रियाणां सम्वन्धित्वेन दमस्य शमस्य क्रिया योजना। विनयो ह्रीन्द्रियजयः। एवं क्लीबानामुपहास्यानां धाष्ट्र्यजननमिति विभावेन हासोऽत्रोक्तः। धाष्ट्र्याज्जननं जन्म यस्य हास्यवस्तुनः। यद् वक्ष्यति–विकृतपरवेषालङ्कारधाष्ट्र्यादिभिः (अ-६.) इत्यादि। विबोध इति ण्यन्तस्य रूपम्। अबुद्धत्वेन प्रसिद्धानां सम्बन्धित्वेन बोधनमुपायोपदेशेन व्युत्पाद्यत्वम्। विदुषां भीष्मादीनाम्। उपायव्युत्पाद्यत्वेन वैदुष्यम्। अनेन स्मृतिमतिप्रभृतीनां निरूपणम्। विलास इति क्रीडा। स्थैर्यमिति व्यवसायात्मकमुत्साहरूपमेव। चशब्द एवकारार्थे। दुःखार्दितत्वेन यः प्रसिद्धस्तस्यैव सम्बन्धित्वेनेत्यर्थः। धृतिर्धैर्यम्। एतदुक्तं भवति–लोकवृत्तानुसारेण यत इयं नाट्यक्रिया लोके च धर्मादयो ना(नाना) श्रयाः न संवेदनयोग्याः तेन धर्मादिविषये यो यथा प्रसिद्धो रामादिः स शब्दमात्रोपयोगित्वेन मुख्यया प्रणालिकया गृहीतः।

एवंभूतं यन्नाट्यं तत् प्रेक्षकाणां दुःखेन व्याध्यादिकृतेन श्रमेणाऽध्वक्लेशादिजेन शोकेन बन्धुमरणादिकृतेनाऽऽर्तानां पीडितानां तथा तपस्विनामनवरतकृच्छ्रचान्द्रायणाद्याचरणकलितदौर्बल्यातिशयपरिखिन्नहृदयानां विश्रान्तिजननं दुःखप्रसरणविघातकम्। प्रतिहतदुःखानां चाऽऽह्लादात्मकधृत्यादिकारणं यथायोगम्। तद् यथा– शोकार्तस्य धृतिर्व्याध्यार्तस्य क्रीडा, श्रमार्तस्य सुखम्, आदिग्रहणेन तपस्विनो मतिविबोधादय इति मन्तव्यम्। न चैतावदेव, यावत्कालान्तरेऽपि (रवि) परिपाकं सुखमुपदेशजं जनयतीत्येवं दुखितानां तत्प्रशमसुखवितरणकालान्तरसुखलाभाः प्रयोजनम्। ये पुनरदुःखिताः सुखभूयिष्ठवृत्तय एव राजपुत्राद्यास्तेषां लोकवृत्ते धर्माद्युपायवर्गे उपदेश-कार्ये तन्नाट्यम्। लोकशब्देन लोकवृत्तम्।

ननु किं गुरुवदुपदेशं करोति? नेत्याह, किन्तु बुद्धिं विवर्धयति। स्वप्रतिभामेव तादृशीं वितरतीत्यर्थः। न च सा दुष्टा प्रतिभेत्याह–हितम्–हितप्रतिभाजनकत्वात्। अत्र हेतुमाह–यतो धर्मादनपेतम्। यशश्शब्देन लोकप्रसिद्धिहेतुभूतमद्भुतकारि वस्तूच्यते, यथा रामस्य सप्तसालव्यथनादि। तदुपदेशो साधु। आयुर्वृद्धिहेतव आचारा आयुः। तेषु साधु। एवं दुःखितानामदुःखितानां चेदमुपादेयमित्युक्तम्। दुखं च शारीरं मानसं वा। शारीरमपि दैवकृतं स्वयंकृतमपि दृष्टं फलो(दृष्टफलो)द्देशेनाऽन्येन चेत्येतावानेव दुःखितवर्ग इति दुःखार्तानामित्यादिभेदोपादानस्य फलम्।

केचित् तु धर्मो धर्मप्रवृत्तानामित्यादि सामाजिकविषयत्वेन व्याचक्षते

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हृदयसंवादयोग्यतातात्पर्येण। अन्ये त्वकारप्रश्लेषादिव्याख्याप्रकारेणाऽधर्मप्रवृत्तानामित्यादिविपरीतत्वेन व्याचक्षते उपदेशत्वाभिप्रायेण। उभयमपि चैतद् धर्म्यं यशस्यमित्यादेः पुनरुक्तम्।।१०८-११५।।

तात्पर्य-दीपिका

भावार्थ—नाट्य-प्रयोगों के भेदों में किसी रूपक अथवा उपरूपक में कहीं धर्म, कहीं क्रीडा, कहीं अर्थ और कहीं शान्ति का तो कहीं हास्य, कहीं युद्ध, कहीं काम और कहीं वध (संहार) का चित्रण रहता है। नाट्यप्रयोगों द्वारा धर्म में प्रवृत्त लोगों के धर्म की, विषयासक्त लोगों के निग्रह(वध) की, अविनयी-उद्दण्ड लोगों के दण्ड की और जितेन्द्रिय लोगों के इन्द्रिय-निग्रह की प्रस्तुति होती है। नाट्य-वेद से नपुंसकों के लिए धृष्टता की, शूर-वीर और अभिमानशीलों के लिए उत्साह की, अज्ञानियों के लिए प्रबोधन की और विद्वानों के लिए विद्वता वृद्धिंगत करने की प्रेरणा मिलती है।नाट्य-वेद ऐश्वर्यशील लोगों के लिए विलासिता की, दीन-दुखियों के लिए स्थिरता की धनार्थियों के लिए अर्थार्जन की और व्याकुलचित्त लोगों के लिए धैर्य-धारण की प्रेरणा प्रदान करता है। मैंने (ब्रह्मदेव ने) विविध भावों से प्रचुर और अनेकविध परिस्थितियों से परिपूर्ण त्रिभुवन के कार्यकलापों के अनुकृतिस्वरूप उस प्रत्यक्षकल्प नाट्यवेद की सृष्टि की है। इस नाट्य में उत्तम, मध्यम और अधम त्रिविध प्रकृति के मनुष्यों के क्रियाकलापों का चित्रण है। उसका साक्षात्कार करने पर उनके अनुकरण से अपने हित की बात उत्पन्न होती है। यह नाट्य धैर्य-क्रीडा-सुख आदि सभी की सृष्टि करता है। (यह नाट्य त्रिभुवन के अन्तर्गत कहीं भी सम्पूर्ण रसों, भावों और समस्त क्रिया-कलापों के विषय में सभी प्रकार के कल्याणकारी उपदेश की सृष्टि करेगा।) जो दुःख से पीड़ित, परिश्रम से थके-मांदे, शोक से व्याकुल हैं, उन बेचारे दीन-हीन लोगों के लिए यह नाट्य विश्रामदायक होगा। यह नाट्य धर्म और कीर्तिदायी है। उसके साक्षात्कार से आयुष्य और वुद्धि की वृद्धि होती हैं और अपने हित की प्रेरणा मिलती है। नाट्यवेद भविष्य में समस्त लोकों में उपदेश का माध्यम होगा।।१०८-११५।।

व्याख्या—त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्, नाट्यवेद समस्त लोकों के क्रियाकलापों को प्रत्यक्ष कराता है। इस प्रकार १०७वें पद्य में वर्णित है। अब यह प्रश्न उपस्थित होता है कि क्या किसी एक रूपक अथवा उसके किसी एक अंक आदि में इसका प्रत्यक्ष किया जाता है? इस प्रश्न का समाधान और नाट्यवेद की सृष्टि का प्रयोजन १०८ से ११५ तक के पद्यों में अंकित है। यह कुलक है। पांच से अधिक पद्यों की परस्पर-साकांक्षता कुलक को जन्म देती है। अभिनवगुप्तपादाचार्य स्पष्ट कहते हैं कि इनकी परस्पर साकांक्षता के कारण 'मुक्तक' के समान भिन्न वाक्य के रूप में इनकी व्याख्या करना समीचीन नहीं है।

नानाभावीयसम्पन्नम् इत्यादि नाट्य के विशेषण इसी साकांक्षता के द्योतक हैं, जो पूर्वोक्त वाक्य योजना(अन्वय) से स्पष्ट हैं।

नानाभावोपसम्पन्नं नाट्यम्—नाट्य नानाविध भावों से व्याप्त रहता है। वे भाव कौन से हैं? क्या वे एकत्र रहते हैं? इन्ही प्रश्नों का विस्तारपूर्वक समाधान **क्वचिद् धर्मः क्वचिद् क्रीडा** इत्यादि पद्य देते हैं। इनमें **क्वचित्** शब्द इन भावों की व्यापकता का संकोच करते हुए विशिष्ट रूपक तक सीमित करता है। भरतमुनि दशरूपकों की

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गणना नाट्य में इसप्रकार करते हैं–

नाटकं सप्रकरणमङ्को व्यायोग एव च।
भाणः समवकारश्च वीथी प्रहसनं डिमः ।।
ईहामृगश्च विज्ञेयं दशमं नाट्यलक्षणम्।
(ना० शा० २०/२-३)

इसप्रकार नाट्य के अन्तर्गत (१) नाटक, (२) प्रकरण, (३) अंक, (४) व्यायोग, (५) भाण, (६) समवकार, (७) वीथी, (८) प्रहसन, (९) डिम और (१०) ईहामृग आते हैं।

'धर्म', क्रीडा आदि शब्द उन उन रसों के उपयुक्त स्थायी और व्याभिचारी भावों के व्यञ्जक हैं। भरतमुनि ने मुख्यतः आठ नाट्यरस और तदनुकूल आठ स्थायी भावों की गणना इसप्रकार की है–(१) शृंगार–रति, (२) हास्य–हास, (३) करुण–शोक, (४) रौद्र–क्रोध, (५) वीर–उत्साह, (६) भयानक–भय, (७) वीभत्स–जुगुप्सा और (८) अद्भुत–विस्मय।(द्र० ना० शा०-६/१५-१७)

इसके अतिरिक्त उन्होंने तैंतीस व्यभिचारी और आठ सात्विक भावों का परिगणन भी किया है।(द्र० वहीं-६/१८-२०)

इनमें धर्म और अर्थ शब्द उत्साह आदि, क्रीडा शब्द विस्मय आदि, और शम शब्द निर्वेद आदि स्थायी भावों का अभिव्यञ्जक है। शान्त रस को नवम रस मानकर निर्वेद को उसका स्थायी भाव माना गया है–

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।

इसमें हास्य शब्द हास आदि स्थायी भाव और युद्ध शब्द रौद्र आदि रस का सूचक है। काम शब्द रति आदि स्थायी भाव और वध शब्द क्रोध, भय, जुगुप्सा, शोक आदि स्थायी भावों का अभिव्यञ्जक है। इन स्थायी भावों से तदनुकूल व्यभिचारी और अनुभावों की सूचना मिलती है। दश-रूपकों का विभाग इन्हीं भावों की प्रमुखता पर आधारित है। जैसे धर्मप्रधान रूपक नाटक, क्रीडाप्रधान और अर्थप्रधान रूपक प्रकरण और प्रसिद्धिप्रधान (?) भाण आदि। केवल नाटक भी इसप्रकार दृष्टि गोचर होते हैं। जैसे छलितराम नाटक में राम का अश्वमेधयाग चित्रित है, अतः वह धर्मप्रधान रूपक है। स्वप्नवासवदत्ता क्रीडाप्रधान नाटक है। इसी प्रकार एक ही नाटक के किसी अंश में धर्म का भी चित्रण रहता है। जैसे अभिज्ञानशाकुन्तल शृंगारप्रधान नाटक होने पर भी प्रथम अंक में दुष्यन्त का यह कथन कि 'कही कुलपति कण्व की कन्या असवर्ण न हो' उसकी धार्मिकता की अभिव्यक्ति कर रहा है।

इस कुलक में दो स्थलों पर 'चकार का प्रयोग है–**अबुधानां विबोधश्च, ईश्वराणां विलासश्च**। ये दोनों चकार हेतुवाचक हैं। क्योंकि नाट्य **लोकवृत्तानुकरण** होता है, तदनुसार वे पात्र प्रस्तुत किये जाते हैं। **धर्मो धर्मप्रवृत्तानाम्** – इसमें राम, युधिष्ठिर आदि पात्रों की प्रवृत्ति धर्म में है। **विनीतानां दमक्रिया**–यहां विनीत शब्द का अर्थ जितेन्द्रिय है। **विनयो हीन्द्रियजयः** (द्र०कामन्दरीय नीतिसार)। उनकी दमक्रिया का तात्पर्य है इन्द्रियों का शमन। **क्लीबानां' धाष्टर्यजननम्** नपुंसकों की धृष्टता का

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अभिनय हास्य की सृष्टि के लिए है। **वैदुष्यं विदुषामपि**– भीष्म आदि पात्रों का वैदुष्य उनके उपाय व्युत्पत्ति से प्रदर्शित होता है। इसीके द्वारा स्मृति, मति आदि व्यभिचारी भावों का निरूपण किया जाता है। **ईश्वराणां विलासश्च**–यहां 'विलास' का अर्थ 'क्रीडा' है। **स्थैर्यं दुःखार्दितस्य च**, यहां स्थैर्य का अर्थ व्यवसायात्मक उत्साह है। 'च' कार का प्रयोग 'एव' के अर्थ में है। इसका तात्पर्य यह है कि जो अत्यंत दुःखी है उसके उत्साह को वढ़ाना, उनमें आशा का संचार नाट्य में चित्रित रहता है। इस प्रकार का नाट्यप्रयोग उन सभी के दुखों को दूर करता है–**विश्रान्तिजननम्**। जो रोग आदि दुःखों से पीडित हैं, उनके लिए क्रीडा का, शोकार्त के लिए धैर्य का, परिश्रम से पीडित के लिए सुख का और तपस्वी जन के लिए मति, विबोध आदि का विधान कर उनके दुखों का शमन करता है। इतना ही नही, जो सुखी हैं उन राजपुत्रों को भी लोकवृत्त द्वारा नाट्य धर्म में प्रवृत्त करता है। नाट्य का उपदेश गुरुसम्मित उपदेशवचन नहीं है, प्रत्युत उनकी प्रतिभा को वृद्धिगत करने वाला प्रत्यक्षकल्प उपदेश है। **धर्म्यं** विशेषण इसी दृष्टि से सार्थक है। **यशस्यम्**– आश्चर्यकारी घटना के चित्रण से उसे प्रसिद्धि भी मिलती है। **आयुष्यम्**–आयुष्यवृद्धि कर आचारों के प्रयोग उनमें मंचस्थ होते हैं। **दुःखार्तानाम्**–नानाविध शारीरिक और मानसिक दुःखों से पीड़ितों के दुःखों का विनाशक है।

कुछ लोग **धर्मो धर्मप्रवृत्तानां** की व्याख्या करते हुए 'धर्मप्रवृत्त' आदि विशेषणों का उन उन पात्रों के साथ सम्बद्ध न करते हुए सामाजिक दर्शक के साथ जोड़ते हैं। कुछ लोग 'धर्मोऽधर्मप्रवृत्तानाम्' इस प्रकार अकार प्रश्लेष के साथ पढ़कर अधर्मप्रवृत्तों के लिए धर्मोपदेश इत्यादि कराते हैं। इनमें प्रथम व्याख्या का अभिप्राय सहृदय संवाद से और द्वितीय व्याख्या का अभिप्राय उपदेश्य से है। किन्तु उक्त दोनों प्रकार की व्याख्याएं इस लिए समीचीन नहीं है कि धर्म्यं यशस्यम् आयुष्यम् इत्यादि पद्यों की ही यह दुबारा व्याख्या होगी। क्योंकि ये पद्य सामाजिक से सम्बद्ध हैं, पात्रों से नहीं।।१०८-११५।।

न तज्ज्ञा[1]नं न तच्छिल्पं न सा पिद्या न सा कला।
नासौ[2] योगो न तत् कर्म[3]नाट्येऽस्मिन् यन्न दृश्यते ।।११६।।[4]
तन्नाऽत्र मन्युः कर्तव्यो भवद्भिरमरान् प्रति।
सप्तद्वीपानुकरणं नाट्यमेतद् भविष्य[5]ति ।।११७।।

अन्वयः– न तत् ज्ञानम्, न तत् शिल्पम् न सा विद्या, न सा कला, न असौ योगः, न तत् कर्म यत् अस्मिन् नाट्ये न दृश्यते। तत् अत्रभवद्भिः अमरान् प्रति मन्युः न कर्त्तव्यः। एतत् नाट्यं सप्तद्वीपानुकरणं भविष्यति।।११६।।११७।।

---

१. श्रुतम्

२. स

३. यन्नाट्येऽस्मिन्न दृश्यते।

४. सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च।
अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम्।।
इत्यधिकम् अन्यत्र।

५. नाट्ये ह्यस्मिन् प्रतिष्ठितम्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अभिनव-भारती

न चाऽनेन प्रधानमात्र एवोपदेशः कृतः पुरुषार्थोपायमात्रे वा। यावत् तदुपायोपेयादिष्वपीति दर्शयति–तदिति। अस्मिन्निति। सप्तद्वीपगतभावानुकीर्तनरूपे नाट्ये दृश्यमाने यन्न दृश्यते न हृदयगोचरमेति तादृग्ज्ञानादिकं नास्तीति शेषः।

ज्ञानमित्युपादेयमात्मज्ञानादि। यथा वेणीसंहारे–आत्मारामा विहितरतयो निर्विकल्पे समाधौ (१-२३) इत्यादि।

शिल्पमिति। मालाचित्रपुस्तादियोजनम्। यथावेष्टितग्रथितगुम्फसंहतैरातैश्च कुसुमैस्सपल्लवैः इत्यादौ।

विद्या दण्डनीत्यादि। यथा शमव्यायामाभ्यां प्रतिविहिततन्त्रस्य नृपतेः (बाल. रा. १-२४) इत्यादौ।

कला गीतवाद्यादिका। यथा व्यक्तिर्व्यञ्जनधातुना (नागानन्द १-१४) इत्यादौ।

योगो योजनं तेषामेव ज्ञानादीनां कलान्तानां स्वभेदैरन्योन्यस्वभेदैः। यथा

मेघाशङ्किशिखण्डिताण्डवविधावाचार्यकं क्ल्पय -
निर्ह्रादो मुरजस्य मूर्च्छीततरां वेणुस्वनापूरितः।
वीणायाः कल्यन् लयेन गमकानुग्राहिणीं मूर्च्छनां
कर्षत्येष च कालकूटितकलारम्यश्रुतिं षाडवे ।।

(हेज्जल-राधाविप्रलम्भ) इत्यादौ। तत्रेहातोद्यनिचयगीतयोजना कृता। अन्योन्यं यथा–आविलपयोधराग्रं लवलीदलपाण्डुकोमलच्छायम् (विक्रमो ५-८) इत्यादौ अत्र हि शृंगारस्य वैद्यकविद्यया योजना।

कर्मेति युद्धनियुद्धादिर्व्यापारः। यथा–

"आलीढस्थितटङ्कितस्य निमितां दृष्टित्रयीं तन्वतः
पुङ्खाग्रक्रमसर्पणेन विशिखप्रान्तादथोच्चैस्तमाम् ।
चक्रीभूतशरासनस्य न मनाल्ल(क् ल)क्ष्यादमी विच्युता -
श्छित्रं चित्रमुमाधवस्य युगपत् सर्वे सुरेन्द्रद्विषः ।। इति।।

एवं सप्रयोजनत्वमभिधाय प्रकृतमेव पुराकल्पमनुबध्नाति–तन्नात्रेति। तदिति। तस्मात्। अत्र नाट्येऽमरान् प्रति न मन्युः कार्यः। तेऽपि तत्र न केचित्।

एतदेवाह–सप्तद्वीपानुकरणमयी हि क्रिया(नटक्रिया) रङ्गे दृश्यते। न च सागरद्वीपादीनां कश्चित् तत्र (त्रा)सम्भव इति भावः।।११६।।११७।।

तात्पर्य-दीपिका

भावार्थ–ऐसा कोई ज्ञान, कोई शिल्प, कोई विद्या, कोई कला, कोई योग और कोई क्रिया-कलाप नहीं है, जो इस नाट्य में दृष्टिगोचर न हो। इसलिए असुरों ! इस विषय में आप देवताओं के प्रति क्रोध न करें। क्योंकि भविष्य में यह प्रत्यक्षगोचर नाट्य सप्तद्वीपा वसुन्धरा का अनुकृतिस्वरूप होगा।।११६।।११७।।

व्याख्या–नाट्य के उपदेश का क्षेत्र सीमित नहीं है। इसके द्वारा केवल मुख्य शिक्षा नहीं मिलती अथवा केवल पुरुषार्थसाधनसम्बन्धी प्रेरणा नहीं मिलती है, अपितु उन उपायों द्वारा प्राप्त किये जा सकनेवाले लक्ष्यसम्बन्धी प्रेरणा भी प्राप्त

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

होती है। 'न तद् ज्ञानं न तत् शिल्पं' इत्यादि पद्य में ज्ञानादि के साथ प्रयुक्त 'यत्' और 'तत्' सर्वनाम इसी को संकेतित करते है। नाट्यवेद प्रत्यक्षकल्प है, जिसमें सप्तद्वीपा वसुन्धरा के समस्त क्रिया-कलापों का साक्षात्कार किया जा सकता है। उसमें ऐसा कोई ज्ञान अथवा शिल्पादि नहीं है, जिसकी अनुभूति सामाजिक को न होती हो। वह प्रत्येक विषय उसके द्वारा हृदयंगम कर सकता है।

न तद् ज्ञानम्–आत्मज्ञान आदि का चित्रण **आत्मारामा विहितरतयो निर्विकल्पे समाधौ** इत्यादि वेणीसंहार नाटक (१/२२) में द्रष्टव्य है। **शिल्पम्–** अभिज्ञान शाकुन्तल नाटक में चित्रांकन वर्णित है। **विद्या**–दण्डनीति आदि का चित्रण 'शम-व्यायामाभ्यां प्रतिविहिततन्त्रस्य नृपतेः इत्यादि बाल-रामायण (१/२४) में अवलोकनीय है। **कला**–गीत-वाद्य आदि ललित कलाओं का अनुभव **'व्यक्तिर्व्यञ्जनधातुना'** इत्यादि नागानन्द (१-१४) के पद्य में किया जा सकता है। **योगः**–'ज्ञान' से लेकर 'कला' तक सभी विषयों का अपने भेदों के साथ अथवा परस्पर संगम भी देखने को मिलता है। **'मेघाशंकिशिखण्डिताण्डवविधौ'** इत्यादि पद्य में मुरज, वेणु, वीणा आदि वाद्यों के साथ गीतयोजना और 'शिखण्डिताण्डव' का संगम इसी का निदर्शन है। 'आविलपयोधराग्रम्' इत्यादि विक्रमोर्वशीय(५-८) के पद्य में वैद्यक के साथ शृंगार की योजना दूसरा दृष्टान्त है। **तत्कर्म**–युद्ध, बाहुयुद्ध आदि क्रियाकलाप भी हम नाट्य में प्रत्यक्ष कर सकते हैं। इसप्रकार ब्रह्मदेव असुरों के प्रतिनिधि विरूपाक्ष को नाट्यवेद का विषय-विस्तार समझाते हुए यह कह रहे हैं कि वह एकदेशीय अथवा एकपक्षीय नहीं होता। आपका अपमान करना इसका उद्देश्य नहीं है। सप्तद्वीपा वसुन्धरा को नट मञ्चस्थ करता है। उसके लिए कोई ऐसा विषय नहीं होता, जिसकी प्रस्तुति वह रंगमंच पर न कर सके। अतः असुरों को देवताओं के प्रति व्यर्थ का क्रोध नहीं करना चाहिए।।११६-११७।।

(येनाऽनुकरणं नाट्यमेतत् तद् यन्मया कृतम् ।।)
देवानामसुराणां[1] च राज्ञामथ कुटुम्बिनाम् ।
ब्रह्मर्षीणां च विज्ञेयं नाट्यं वृत्तान्तदर्शकम्[2] ।।११८।।
योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः ।
सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते ।।११९।।

अन्वयः–(येन मया कृतम् एतत् नाट्यम् अनुकरणम्। नाट्यं देवानाम् असुराणां च, राज्ञाम् अथ कुटुम्बिनां ब्रह्मर्षीणां च वृत्तान्तदर्शकं विज्ञेयम् । लोकस्य सुखदुःखसमन्वितः यः अयं स्वभावः, अङ्गाद्यभिनयोपेतः सः नाट्यम् इति अभिधीयते।।११८-११९।।

अभिनव-भारती

ननु किमर्थमेषां नामानि गृहीतानीत्याशङ्क्याऽऽह–देवानामित्यादि। एतेषामेवाऽधिकारिपुरुषत्वात् निराधारस्य वृत्तस्य दर्शयितुमशक्यत्वात् । एतच्चोक्तं पूर्वम्। अत एव यत्र निर्व्याजसहजौदार्यधर्मादिविषये बलिप्रह्लादप्रभृतेः

१. ऋषीणाम् ।
२. कृतानुकरणं लोके नाट्यमित्यभिधीयते।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रसिद्धिस्तत्र सोऽप्युदीरित आश्रयत्वेन। तदाह–असुराणामिति। न च भवद्वैरिण एवाऽत्र वर्णिताः अपि तु ब्रह्मर्षयोऽपि। अनेन 'प्रत्यादेशोऽयमस्माकम्, सुरार्थम्' इत्याशङ्काद्वयमपि परिहृतम्। एतत् तात्पर्येणोपसंहरति–योऽयमिति। अयमिति प्रत्यक्षकल्पानुव्यवसायविषयः। लोकप्रसिद्धसत्यासत्यादिविलक्षणत्वात् यच्छब्दवाच्यः। लोकस्य सर्वस्य साधारणतया स्वत्वेन भाव्यमानश्चर्व्यमाणोऽर्थो नाट्यम्। स च सुखदुःखरूपेण विचित्रेण समनुगतः। न तु तदेकात्मा।

तथा हि–रतिहासोत्साहविस्मयानां सुखस्वभावत्वम्। तत्र तु चिरकालव्यापिसुखानुसन्धिरूपत्वेन विषयौन्मुख्यप्राणतया तद्विषयाशंसा-वाहुल्येनाऽपायभीरुत्वाद् दुःखांशानुवेधो रतेः। हासस्य सानुसन्धानस्य विद्युत्-सदृशतात्कालिकाऽल्पदुःखरूपसुखानुगतौ। उत्साहस्य तात्कालिकदुःखायासरूप-निमज्जनानुसन्धाना यदि(नाऽपि) भाविबहुजनोपकारिचिरतरकालभावि-सुखसञ्चिकीर्षात्मना सुखरूपता। विस्मयस्य निरनुसन्धानतडित्तुल्यसुखरूपता।

क्रोधभयशोकजुगुप्सानां तु दुःखरूपता। तत्र चिरकालदुःखानुसंधिप्राणो विषयगतामन्तिकानां(तात्यन्तिकनाश) भावनाकांक्षाप्राणतया सुखदुःखा-नुवेधवान् क्रोधः। निरनुसन्धितात्कालिकदुःखप्राणतया तदपगमाकांक्षोत्प्रेक्षित-सुखानुसम्भिन्नं भयम्। द्वैकालिकस्त्वभीष्टविषयनाशजः प्राक्तनसुखस्मरणा-नुविद्धः सर्वथैव दुःखरूपः शोकः। उत्पाद्यमानसुखानुसन्धानजीवितविषयात् प(या प) लायनपरायणरूपान्नि(पा नि) षिध्यमानशङ्कितसुखानुविद्धा जुगुप्सा। समस्तम (त) त्पूर्वदुःखसञ्चयसंस्मरणप्राणितः (तोऽ)सम्भावितततदुपरमबहुल-सुख(दुःख) मयो निर्वेदः। एवं व्यभिचारिप्रवृतिष्वपि वाच्यम्। संवित्स्वभावाः सुखादय इति च दर्शने न तत्स्वभावत्वम्। अन्येत्व(तस्त्व)त्र तद्वेदनरूपत्वमेव तेषां मन्तव्यम्। एवं लौकिका ये सुखदुःखात्मानो भावा तत्सदृशस्तत्संस्कारानु-विद्धो नाट्यलक्षणोऽर्थः समुदायरूपस्तस्यैव भागानुसमयः।

एवं दयारत्यादिरूपानुसरणभूतो (एवंभूतो) नाट्यलक्षणोऽर्थः कथं प्रती-तिगोचरीभवतीत्याह–अङ्गादीति। येऽभिनयाः आङ्गिकादयः न च ते लिङ्ग-सङ्केतादिरूपाः, अपि तु प्रत्यक्षसाक्षात्कारकल्पलौकिकसम्यङ्मिथ्या-ज्ञानादिरूपाः। तस्यैव भावाः शृङ्गारादयो रत्यादिविलक्षणास्वादपर्यायप्रतीत्यु-पयोगिनः। अत एवाऽभिमुख्यनयनहेतुत्वादन्यलोकशास्त्राप्रसिद्धेनाऽभि-नयशब्देन व्यपदेश्याः। तथाऽङ्गानि शाखानृत्तगीतानि आदयः प्रधाना येषां तेऽङ्गादयः। तथाऽङ्गानि व्यभिचारिणो भावाः आदयो हेतुरूपा विभावाः। अभिनयाः अनुभावाः। त एते रसाभिमुख्यनयनहेतवः। यद् वक्ष्यते–**विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः** इति। (अ-६.) तैरुपेतः। उप समीपमितः संविद्दर्पणमभिसङ्क्रान्तः। एवंभूतोऽर्थो नाट्यं नटनीयं नर्तनम्। तथा गमनीयं यत्नेन स्वरूपतो हृदयेनाऽनुप्रवेष्टव्यम्। तथा नाटकानां (नटानां) पारम्पर्यात्मकं वृत्तं नाट्यं धर्माम्नायरूपं च। तच्च सुख-दुःखाभ्यां फलरूपाभ्यां

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सम्यगन्वितम्, तेषां पश्चाद्भावित्वात्। तेन हेयोपादेयव्युत्पत्तिः फलम्। एतच्च वितत्याऽग्रे भावस्वरूपं निरूपयिष्यामः।।११८-११९।।

तात्पर्य-दीपिका

भावार्थ–(क्योंकि मेरे, ब्रह्मदेव के) द्वारा विरचित यह नाट्य त्रिभुवन के कार्यकलापों का अनुकरण है।) इस नाट्यवेद को देवता, दानव, राजाओं, उनके परिजन(प्रजा) तथा ब्रह्मर्षियों के चरित्रों का साक्षात्कार कराने वाला समझना चाहिए। समस्त जगत् सुख और दुःख से परिपूर्ण है और वही उसका स्वभाव है। इस स्वभाव की आंगिक, वाचिक, आहार्य और सात्विक इन चार प्रकारों के अभिनय द्वारा जो प्रस्तुति होती है, उसी को नाट्य कहते हैं।।११८-११९।।

व्याख्या– असुरों के प्रतिनिधि विरुपाक्ष द्वारा लगाये गये **प्रत्यादेशऽयमस्माकं सुरार्थं भवता कृतः** इस आरोप का यह प्रत्युत्तर है। नाट्यवेद न तो केवल देवताओं को प्रसन्न करने के लिए है और न असुरों को अपमानित करने के लिए है। उसमें केवल देवताओं का विजय और केवल असुरों का पराजय ही चित्रित नहीं है, प्रत्युत देवताओं से लेकर ब्रह्मर्षियों तक का वृत्तांत चित्रित है। उसमें निर्व्याज स्वाभाविक उदारता, धर्म आदि के सन्दर्भ में बलि-प्रह्लाद आदि असुर-राजाओं का भी चित्रण है।

अङ्गाद्यभिनयोपेतः– नाट्य प्रत्यक्षकल्प और अनुव्यवसायात्मिका बुद्धि का विषय होता है। उस नाट्य में त्रिभुवन के समस्त दुःख और सुखों को अंकित किया जाता है, जिसके लिए 'अभिनय' का आश्रय लेना पड़ता है। 'अभिनय' शब्द 'अभि' उपसर्ग, प्रापणार्थक 'णीञ्' धातु और 'अच्' प्रत्यय से निष्पन्न है। नाट्यशास्त्र में 'अभिनय' की परिभाषा और उसके चार भेद इस प्रकार वर्णित हैं–

अभिपूर्वस्तु णीञ् धातुराशिमुख्यार्थनिर्णये।
यस्मात् पदार्थान् नयति तस्मादभिनयः स्मृतः।।
विभावयन्ति यस्माच्च नानार्थान् हि प्रयोगतः।
शाखाङ्गोसंयुक्तस्तस्मादभिनयः स्मृतः।।
चतुर्विधश्चैव भवेन्नाट्यस्याऽभिनयो द्विजाः!।
अनेकभेदबाहुल्यं नाट्ये ह्यस्मिन् प्रतिष्ठितय्।।
आङ्गिको वाचिकश्चैव आहार्यः सात्विकस्तथा।
ज्ञेयस्त्वभिनयो विप्राश्चतुर्धा परिकल्पितः।।"(ना.शा.८/६-९)

रसों के उपयुक्त रति आदि स्थायी भाव, निर्वेद आदि व्यभिचारी भाव और स्तम्भ आदि सात्त्विक भावों की अनुभावों (चेष्टाओं) द्वारा प्रस्तुति ही नाट्य है, जिसका मुख्य आधार है अभिनय। 'अभिनय' का तात्पर्य प्रयोग द्वारा दर्शकों को विविध विषयों का साक्षात्कार कराना है। वह चार प्रकार से संभव है–

(१) आंगिक अभिनय–वह मुख्यतया तीन प्रकार का होता है–(क) दृष्टि का अभिनय, (ख) शरीर के अंग-प्रत्यंग का अभिनय और (ग) मुख की विशिष्ट भाव भंगिमाएं। इनमें (क) दृष्टि का अभिनय विविध रस, स्थायी भाव और व्यभिचारी भावों की विशिष्ट दृष्टिप्रकारों से विविध होता है। शिर, हस्त, चक्षु, पार्श्व, कटि और पाद ये छः अंग हैं, इनका अभिनय आंगिक अभिनय है। नेत्र, भ्रू, नासिका, अधर,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कपोल और अधर ये उपाङ्ग हैं। इनमें नेत्र का अभिनय दृष्टि से संबंधित है, और अन्य उपांगों का संबंध मुख से है। इस प्रकार त्रिविध अभिनय आंगिक अभिनय है। इनका उपयोग विशेषतया नृत्य में अधिक होता है।

(२) **वाचिक अभिनय**–अभिनय में संगीत के सात स्वर, उरस्-शिर और कण्ठ ये तीन स्थान, उदात्त, अनुदात्त, स्वरित और प्रकम्पित ये चार स्वर वर्ण, साकांक्ष और निराकांक्ष विशिष्ट ध्वनि(काकु), उच्च दीप्त आदि छः स्वरालंकार, विच्छेद-अर्पण आदि छः अंगों का अधिक महत्त्व है। वाचिक अभिनय आज रेडियों में अत्यधिक उपादेय है।

(३) **सात्विक अभिनय**–स्वेद-स्तम्भ आदि सात्त्विक भावों की प्रस्तुति सात्त्विक अभिनय है।

(४) **आहार्य अभिनय**–इसके अन्तर्गत नेपथ्यविधान आता है, जिसमें वेश-भूषा, केश-प्रसाधन, मेकअप् आदि सभी समाविष्ट हैं।

प्रस्तुत पद्य में प्रयुक्त 'यत्' सर्वनाम नाट्यवेद की लोकविलक्षणता घोषित कर रहा है। वह नाट्यवेद लोक में प्रसिद्ध सत्य-असत्यादि से विलक्षण है। लोक के जिस विषय-वस्तु की अपनत्व की भावना के साथ रसानुभूति, चर्वणा की जाती है, वही नाट्य है । उसमें सुख की भी अनुभूति होती है और दुःख की भी। अतः वह सुखदुःखात्मक न होकर सुखदुःखसमन्वित है। शृंगार, हास्य, वीर और अद्भुत रस के स्थायी भाव यथाक्रम रति, हास, उत्साह और विस्मय हैं। इनका स्वभाव ही सुखमय है। रौद्र, भयानक, करुण और वीभत्स रस के स्थायी भाव यथाक्रम क्रोध, भय शोक और जुगुप्सा हैं। इनका स्वभाव दुःखमय है। यद्यपि सुखस्वभाव के स्थायी भावों में लेशमात्र दुःख और दुःखस्वभाव के स्थायी भावों में लेशमात्र सुख भी रहता है। (द्र० अभिनव-भारती।) निर्वेद शान्तरस का स्थायी भाव है। इसी प्रकार व्यभिचारी भाव भी सुखदुःखस्वभाव हैं। इन सबकी अनुभूति आंगिक आदि चतुर्विध अभिनय द्वारा होती है, वही नाट्य है। 'अङ्गादिभिः अभिनयैः उपेतः अङ्गाद्यभिनयोपेतः। अङ्गाद्यभिनयोपेतः नाट्यम्।'

इसकी अन्य दो व्याख्याएं अभिनवगुप्तपादाचार्यइस प्रकार करते हैं–

(१) 'अङ्गानि शाखानृत्तगीतानि, आदयः प्रधानाः येषां ने अंगादयः, तैः उपेतः नाट्यम्।' अमरकोष' के अनुसार 'तौर्यत्रिक' और 'नाट्य' पर्यायवाची हैं, जिसमें नृत्य-गीत-वाद्य तीनों का समावेश है।

तौर्यत्रिकं नृत्य-गीत-वाद्यं नाट्यमिदं त्रयम्।'

(२) अंगानि व्यभिचारिणो भावाः, आदयः हेतुरूपाः विभावाः, अभिनयाः= अनुभावाः, तैः उपेतः नाट्यम्। विभाव, अनुभाव और व्यभिचारि भावों से युक्त नाट्य होता है। अर्थात् जिसमें रससृष्टि होती है, वह दृश्यकाव्य नाट्य है। 'उपेतः उप समीपम्, इतः अभिसंक्रान्तः।'

तीनों निर्वचनों का निष्कर्ष यह है कि नाट्यवेद वह प्रक्रिया है, जिसके द्वारा सामाजिक समस्त जगत् की सुखदुःखानुभूति को आत्मसात् करता है। उसका मुख्य प्राण है–चतुर्विध अभिनय। नृत्य-गीत और वाद्य उसके हृदयावर्जक अंग हैं और रस आत्मा । क्योंकि विभाव- अनुभाव और व्यभिचारी भाव के संयोग से रसनिष्पत्ति

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

होती है–'विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः' (ना० शा० अ० ६)। तृतीय निर्वचन इसी की ओर संकेत कर रहा है और इसका विस्तृत विवेचन नाट्यशास्त्र के भावस्वरूप में के अवसर पर किया गया है।।११८-११९।।

(वेदविद्येतिहासानामाख्यानपरिकल्पनम् ।
विनोदकरणं[1] लोके नाट्यमेतद् भविष्यति ।।
श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनम् ।
विनोदजननं लोके नाट्यमेतद् भविष्यति ।।)
एतस्मिन्नन्तरे देवान् सर्वानाह पितामहः ।
[2]क्रियता[3]मद्य विधिवद् यजनं नाट्यमण्डपे ।।१२०।।
बलिप्रदानैर्होमैश्च मन्त्रौषधिसमन्वितैः ।
[4]भोज्यैर्भक्ष्यैश्च पानैश्च[5] बलिः समुपकल्प्यताम् ।।१२१।।
मर्त्यलोकगताः सर्वे शुभां पूजामवाप्स्यथ[6] ।
अपूजयित्वा रङ्गं तु नैव प्रेक्षां प्रवर्तये[7]त् ।।१२२।।

अन्वयः–("एतत् नाट्यं वेदविद्येतिहासानाम् आख्यानपरिकल्पनं लोके विनोदकरणं भविष्यति। एतन् नाट्यं श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनं लोके विनोदचरणं भविष्यति।) एतस्मिन् अन्तरे पितामहः सर्वान् देवान् आह–"अद्य नाट्यमण्डपे विधिवद् यजनं क्रियताम्। मन्त्रौषधिसमन्वितैः बलिप्रदानैः होमैः च भोज्यैः भक्ष्यैः च पानैः च बलिः समुपकल्प्यताम्। मर्त्यलोकगताः सर्वे(यूयं) शुभां पूजाम् अवाप्स्यथ। रङ्गम अपूजयित्वा तु प्रेक्षां नैव प्रवर्तयेत्।"।।१२०-१२२।।

अभिनव-भारती

एवं सान्त्वेनापसारितेष्वपि विघ्नेषु दिव्यनिदेशनानाममोघत्वात् पूर्वविनियुक्तदेवतांशानां तत्र तत्र सन्निधानाद् यजनंमवश्यं कार्यमिति प्रदर्शयितुमुक्तमेवेतिहासमनुसन्दधन् निरूपयति–एतस्मिन्निति। अन्तर इति समये। विधिवदिति व्याचष्टे–बलिप्रदानैरित्यादि। बल्यन्ते आप्याय्यन्ते देवता अनेनेति बलिः विचित्रवर्णतण्डुलादिरचनाविशेषः। तिलादयश्चाग्नौ हूयन्त इति होमाः। उभयत्र विशेषणं मन्त्रौषधीति। मन्त्रः वक्ष्यमाणः। ओषधयो वचाबलाजमोदप्रभृतयः। प्रशस्तानि धान्यानि च। खरविशदं शष्कुलीमोदकादि भोज्यं भक्ष्यमुच्यते। भक्षणीयन्तु भक्ष्यपायसकृसरादि। पानानि क्षीरेक्षुद्राक्षारसादीनि। बलिः पूर्वोक्तो रचनाविशेषः। एतैर्विच्छित्तियोजितैर्विविधतया कल्प्यताम्। शोभाप्रधानं हि नाट्ये सर्वम्।

ननु देवानां देवपूजाकरणे किं फलमित्याह–मर्त्यलोकगता इत्यादि। यद् यदाचरति श्रेष्ठ इति न्यायादिति भावः। प्रवर्तयेदिति। देवानुष्ठिता-

---

१. जननं – पा.
२. कुरुध्वम्– पा.
३. अत्र, नाट्ये – पा.
४. जप्यैः – पा.
५. भोज्यैः –पा.।
६. मर्त्यलोकेष्वयं वेदः शुभां पूजामवाप्स्यति – पा.।
७. प्रवर्तते – पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चारानुवर्तित्वात्। लोक इति शेषः।।१२०-१२२।।

तात्पर्य-दीपिका

भावार्थ–("यह नाट्य भविष्य में वेदविद्या और उसके इतिहास की आख्यायिकाओं की संरचना करते हुए त्रिभुवन में विनोद अर्थात् दुःखों का परिहार करेगा। साथ ही इसमें श्रुति से सम्बद्ध स्मृतियों तथा सदाचार को भी चित्रित किया जायेगा।") इस प्रकार विरूपाक्ष को समझाते हुए बीच में ही पितामह ब्रह्मदेव ने सभी देवों से कहा–'आप आज नाट्यशाला में शास्त्रीय रीति से हवन करें। आप मन्त्र और औषधियों से युक्त बलिदान, होम, भक्ष्य-भोज्य और पेय द्रव्यों से पूजा-सामग्री सज्जित करें। फलतः मृत्युलोक में पहुंचने पर वहां के निवासियों द्वारा आपकी विधिवत् और मंगलमय अर्चना होगी। बिना रङ्गमंच की पूजा के नाट्यप्रयोगों को मंचस्थ नहीं करना चाहिए।।१२०-१२२।।

व्याख्या–इसप्रकार पितामह ब्रह्मदेव नें असुरों के प्रतिनिधि विरूपाक्ष को समझाकर यद्यपि विघ्न-वाधा दूर की, तथापि पितामह ब्रह्मदेव द्वारा देवताओं को पूर्व में कुछ निर्देश दिए गये थे, जो प्रभावी थे, व्यर्थ नहीं थे। अत एव देवता नाट्यशाला के विविध भागों में अंशरूप में विद्यमान थे। उनकी संतृप्ति के लिए बलि और यजन आवश्यक था। उसी इतिहास की चर्चा यहां की गयी है। यजन (हवन) की शास्त्रीय पद्धति और फलश्रुति भी यहां प्रदर्शित है। हवन को 'होम' इसलिए कहते हैं कि हवनकुण्ड में तिल-घृत आदि हविर्द्रव्यों की आहुतियां समर्पित की जाती हैं। वे आहुतियां समंत्रक होती हैं, और हवनीय सामग्री में वचा, वला, शमी आदि वनस्पतियां और यव आदि प्रशस्त धान्य सम्मिलित हैं। जलेवी, मोदक आदि भोज्य द्रव्य हैं। खीर आदि 'भक्ष्य' द्रव्य हैं। दूध, गन्ने का रस, अंगूर का रस, शर्बत आदि पेय पदार्थ 'पानक' के अन्तर्गत हैं। पूजा सामग्री में उक्त द्रव्य सम्मिलित होने चाहिए। 'यद् यदाचरति श्रेष्ठस्तत् तदेवेतरो जनः' इस न्याय के अनुसार मर्त्यलोक के निवासी देवताओं का अनुकरण करते हैं और मुत्यु-लोक में देवताओं की पूजा करते हैं। बिना रंगदेवता की पूजा किये नाट्यप्रस्तुति नही करनी चाहिए।।१२०-१२२।।

अपूजयित्वा रङ्गं तु यः प्रेक्षां कल्पयिष्यति ।
निष्फलं तस्य तत् [1]ज्ञानं तिर्यग्योनिं च यास्यति ।।१२३।।

अन्वयः–यः तु रङ्गम् अपूजयित्वा प्रेक्षां कल्पयिष्यति, तस्य त् ज्ञानं निष्फलम्, सः तिर्यग्योनिं च यास्यति।।१२३।।

अभिनव-भारती

ननु यदि लोकः सदाचारं नाऽनुवर्तेत, ततः किमित्याह–अपूजयित्वेति। निष्फलमिति। तस्येति नाट्याचार्यस्य। पारलौकिकमपि प्रत्यवायमाह–तिर्यग्-योनिं चेति॥१२३॥

तात्पर्य-दीपिका

भावार्थ–जो बिना रंगदेवता की पूजा किये नाट्य-प्रस्तुति करता है, उसका वह समस्त ज्ञान निष्फल है। (और उसका जीवन पशु-पक्षितुल्य है।) वह निश्चित ही पशु-पक्षी

१. तस्य तन्नित्फलं ज्ञानम्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

की योनि में जन्म लेगा।।१२३।।

व्याख्या– प्रस्तुत पद्य में सदाचार के विपरीत आचरण का परिणाम अंकित है। रंगपूजन के उल्लंघन का प्रत्यक्ष परिणाम उसके ज्ञान की निष्फलता और पारलौकिक परिणाम पशु-पक्षी की योनि में जन्म लेना है।।१२३।।

यज्ञेन संमितं ह्येतद् रङ्गदैवतपूजनम्।
तस्मात् सर्वप्रयत्नेन कर्तव्यं नाट्ययोक्तृभिः[1] ।।१२४।।
नर्तकोऽर्थपतिर्वापि यः पूजां न करिष्यति।
न कारयिष्यत्यन्यैर्वा प्राप्नोत्यपचयं तु सः[2] ।।१२५।।
यथाविधि यथादृष्टं[3] यस्तु पूजां करिष्यति।
स लप्स्यते शुभानर्थान् स्वर्गलोकं च यास्यति[4] ।।१२६।।

अन्वयः–हि एतत् रङ्गदैवतपूजनं यज्ञेन सम्मितम्, तस्मात् नाट्योक्तृभिः सर्वप्रयत्नेन कर्त्तव्यम्। यः नर्तकः अर्थपतिः अपि वा पूजां न करिष्यति, अन्यैः वा न कारयिष्यति, सः तु अपचयं प्राप्नोति। यस्तु यथाविधि यथादृष्टं पूजां करिष्यति, सः शुभान् अर्थान् लप्स्यते, स्वर्गलोकं च यास्यति।।१२४-१२६।।

अभिनव-भारती

ननु यद्यपूजने प्रत्यवायस्तर्हि पूजने किं तन्निवृत्तिमात्रं फलम्? नेत्याह–यथाविधीति यथा देवैर्विहिता। कथमेतज्ज्ञायत इत्याह–यथादृष्टमिति। शास्त्रदृष्टोऽसौ विधिरित्यर्थः। अर्थान् शुभानिति। ऐहलौकिकधनमान-प्रसिद्धिलाभ उक्तः।।१२४-१२६।।

तात्पर्य-दीपिका

भावार्थ–क्योंकि रंगदेवता की पूजा करना यज्ञ के समान है, इसलिए नाट्य-कर्मी प्रयत्नपूर्वक उसे अवश्य करें। जो नट अथवा राजा-सेठ आदि रंगदेवता का पूजन नहीं करता, अथवा दूसरों से नहीं कराता, उसका ह्रास होता है। जो शास्त्रीय पद्धति से, जिस प्रकार देखता चला आ रहा हो, उसी प्रकार पूजा का सम्पादन करता है, उसका मंगल होता है उसे स्वर्गलोक की प्राप्ति होती है।।१२४-१२६।।

व्याख्या– उक्त पद्यों में रंगदेवता की पूजा न करने का और उसके करने का फल प्रतिपादित है। सब के लिए जो यज्ञ का फल है, वही नाट्यशिल्पी के लिए रंगदेवता की पूजा का फल है। अव यह प्रश्न उपस्थित है कि पूजा न करने से नाट्यकर्मी के सम्मुख विघ्नबाधा उपस्थित होती है, तो क्या पूजन करने से मात्र विघ्न बाधा दूर होगी? इसका उत्तर है नहीं। साथ ही उसका मंगल भी होगा और स्वर्गप्राप्ति भी होगी। 'यथाविधि यथादृष्टम्' का अभिप्राय यह है कि वह पूजन शास्त्रसम्मत होना चाहिए, अशास्त्रीय नहीं। 'शुभान् अर्थान् लप्स्यते' का अर्थ है वह समाज में धन-मान-प्रसिद्धि प्राप्त करेगा।।१२७।।

---

१. रङ्गपूजनम्–पा.।
२. कारयिष्यति वा चैव प्राप्स्यत्यपचयं तु सः–पा.।
३. यथाशास्त्रम्–पा.।
४. गमिष्यति–पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एवमुक्त्वा[1] तु भगवान्[2] द्रुहिणः सह दैवतैः ।
रङ्गपूजां कुरुष्वेति मामेवं समचोदयत् ।।१२७।।

।।इति श्रीभारतीये नाट्यशास्त्रे नाट्योत्पत्तिर्नाम प्रथमोऽध्यायः।।१।।

अन्वयः—भगवान् द्रुहिणः तु दैवतैः सह एवम् उक्त्वा 'रङ्गपूजां कुरुष्व' इति एवं मां समचोदयत्।।१२७।।

अभिनव-भारती

एवं मर्त्यान् प्रत्यभिधाय प्रकृतमेव पुराकल्पमनुसन्धत्ते—एवमुक्त्वेति। नाट्याचार्यस्यैव देवयजनेऽधिकारः। तस्यैव फललाभः। कवेः प्रेक्षाप्रवर्तयितुश्च तत्प्रयोक्तृत्वमित्यनेनोक्तम्। रज्यतेऽनेनेति रङ्गो नाट्यम्। तदाधारत्वान्मण्डपः। तदधिष्ठातृत्वाच्च देवता अपीति मण्डपाध्यायस्य द्वितीयस्योपोद्घातं करोतीति विशेषः।।१२७।।

त्रिनेत्रपादाब्जसदास्तवो (समाश्रयो)ल्लसत्-
प्रसादभाक् स्फुटमिह नाट्यशासने ।
प्रवर्तितेयं हृदये महाधियां
प्रकाशतामभिनवगुप्तभारती ।।

।।इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायामभिनवभारत्यां भारतीय-नाट्यशास्त्रविवृतौ नाट्योत्पत्तिः प्रथमोऽध्यायः।।१।।

तात्पर्य-दीपिका

भावार्थ— भगवान् ब्रह्मदेव ने इसप्रकार कहकर मुझे (भरतमुनि को) देवताओं के साथ रङ्गपूजा करने के लिए इस प्रकार प्रेरित किया।।१२७।।

व्याख्या—'क्रियतामद्य विधिवद् यजनं नाट्यमण्डपे' पद्य से लेकर 'स लप्स्यते शुभान् अर्थान् स्वर्गलोकं च यास्यति' पद्य तक नाट्यमण्डप की पूजा का जो विधान किया गया है, वह विशेषतः मृत्युलोकवासियों के लिए है। यद्यपि ब्रह्मदेव ने देवताओं को नाट्यमण्डप की पूजा के लिए प्रेरित किया। ब्रह्मदेव नाट्यशास्त्र के प्रवर्तक हैं, जिसका प्रथमोपदेश उन्होनें भरतमुनि को दिया। **मामेवम् समचोदयत्** इस अंश से यह ध्वनित होता है कि रङ्गपूजा का अधिकार केवल नाट्याचार्य को ही है और उसका फल भी उसी को प्राप्त होता है। नाटककार और रङ्गकर्मी दोनों प्रयोक्ता की कोटि में आते हैं।

रङ्गपूजां कुरुष्व—रङ्ग शब्द से नाट्य, नाट्यमण्डप और उसके अधिष्ठाता देवता ये तीनों अर्थ अभिव्यंजित होते हैं। **रज्यते अनंन इति रङ्गः** इस निर्वचन के अनुसार जिसके द्वारा मनोरंजन होता है, वह नाट्य रङ्ग कहलाता है। जहां उसका मंचन किया जाता है, वह नाट्यमण्डप भी रङ्ग कहलाता है और रङ्ग (नाट्य-मण्डप) की अधिष्ठात्री देवता भी रङ्ग कहलाती हैं। इस प्रकार द्वितीय मण्डपाध्याय का उपक्रम भी इसमें निहित है।

।।इस प्रकार भरतमुनिकृत नाट्यशास्त्र की व्याख्या 'तात्पर्यदीपिका' का नाट्योत्पत्ति नामक प्रथम अध्याय सम्पूर्ण हुआ।।१।।

●

---

१. एवं भवत्विति प्राह—पा.
२. शास्त्रोत्पत्तिर्नाम—पा.

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथ द्वितीयोऽध्यायः

भरतस्य वचः श्रुत्वा पप्रच्छु[1]र्मुनयस्ततः[2]।
भगवन् श्रोतुमिच्छामो यजनं रङ्गसंश्रयम् ।।१।।
अथवा याः क्रियास्तत्र लक्षणं यच्च पूजनम्।
भविष्यद्भिर्नरैः कार्यं कथं [3]तन्नाट्यवेश्मनि ।।२।।

अन्वयः – ततः मुनयः भरतस्य वचः श्रुत्वा पप्रच्छुः। 'भगवन् ! रङ्गसंश्रयं यजनं श्रोतुम् इच्छामः। अथवा याः तत्र क्रियाः, यच्च लक्षणं पूजनम् , भविष्यद्भिः नरैः तत् नाट्यवेश्मनि कथं कार्यम्?।।१।।२।।

अभिनव-भारती

संसारनाट्यजननधातृबीजलताजुषीम् ।
जलमूर्ति शिवां पत्युः सरसां पर्युपास्महे ।।

वृत्तेऽध्याये यथातत्त्वमिति (१-५) वचनवशात् भरतमुनिर्यजनादेःपाठ्यादिवदन्तरङ्गतो पश्यन् परमार्थनिर्णयेन कुर्यात्। अत एव मुनिः 'गानं रङ्गश्च सङ्ग्रहः' (६-१०) इति रङ्गं सर्वं पश्चाद् वक्ष्यति। किन्तु (द्वितीये तु) कथं मण्डपलक्षणं स्यात् ? इत्याशङ्कमाना 'मुनयः पप्रच्छुः' इति परिकल्प्य मुनिराह– भरतस्य वच इति। ब्रह्मैव कविः, शक्र इव प्रयोजयिता, भरत इव नाट्याचार्यः, कोहलादय इव नटाः, अप्सरस इव सुकुमारोपकरणं, स्वातिरिवानद्धवित् , नारदवद् गीतज्ञः, सुरक्षितो मण्डपः, इन्द्रोत्सवसदृशः प्रयोगकालः, प्रशान्तरागद्वेषादिकाः सामाजिकाः, देवतापूजनपूर्वकः प्रयोग इत्येवं सङ्ग्रहेण पूर्वाध्यायनिरूपितमर्थमवधार्येत्यर्थः। (यजनमिति।) 'रङ्गपूजां कुरुष्व' इति वृत्तेऽध्याये निरूपितमिति सङ्गतिः। देवविषये मण्डपस्य क्रियां विना न निष्पत्तिरिति प्रथमं क्रियाप्रश्नस्तेषां विस्मृतोऽपि झटिति स्मृतिं गत इत्यभिप्रायेण दर्शयति– अथ वेति। पूर्वप्रश्नार्थोपमर्दनाय। अत एव पूजनमिति पुनर्वचनम्। क्रियाः कर्तव्यता। लक्षणं सन्निवेशपरिमाणादि। अतीतेषूपदेशो व्यर्थ इति भविष्यद्भिरित्युक्तम्। देवानां मनसा सम्पत्तेः नरैरिति। ननु लक्षणं किं कार्यम्? लक्ष्यत इति लक्षणं सन्निवेश इत्यदोषः। अथ वा भाविभिर्यत् कार्यं नाट्यवेश्म तत्र यत् क्रियालक्षणं पूजनं तत् कथमिति सम्बन्धः।।१।।२।।

तात्पर्य-दीपिका

भावार्थः–भरतमुनि के वचन को सुनकर मुनियों ने पुनः प्रश्न किया–'भगवन्! हमलोग रङ्गदेवता से संबद्ध हवन के सन्दर्भ में सुनना चाहते हैं। उस हवन में जो क्रियाकलाप होते हैं, पूजा का जो लक्षण है, भविष्य में नाट्यशाला में रंगकर्मी उसका सम्पादन किस प्रकार करेगे इस विषय में हम जानना चाहते हैं।।१।।२।।

सन्दर्भ–नाट्योत्पत्ति नामक प्रथमाध्याय में मुनियों ने भरतमुनि से पांच प्रश्न किये थे–

---

१. प्रत्यूचुः।
२. तदा।
३. वै।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नाट्यवेदः कथं ब्रह्मन्नुत्पन्नः कस्य वा कृते ।
कत्यंगः किंप्रमाणश्च प्रयोगश्चास्य कीदृशः ।।(ना. शा.१/४-५)

और उसका यथातत्त्व (तात्त्विक) उत्तर जानना चाहते थे। भरत मुनि जिसप्रकार पाठ्य आदि को हृदयंगम करते हैं, उसी प्रकार यजन(हवन) आदि को भी। अत एव वे षष्ठाध्याय में 'गानं रङ्गश्च सङ्ग्रहः'(६-१०) इत्यादि वचनों से रङ्गसम्बन्धी सभी विवेचन कर रहे हैं। इस अध्याय में मण्डपविधान का विवेचन है, अतः इसी से संवद्ध ऋषियों द्वारा जिज्ञासा की परिकल्पना करते हुए उसका समाधान प्रस्तुत कर रहे हैं।

व्याख्याः—भरतस्य वचः श्रुत्वा— प्रश्नकर्ता मुनि यह जानते थे कि कवि ब्रह्मदेव के समान होता है। आचार्य मम्मट ने तो कविसृष्टि को ब्रह्मदेव की सृष्टि से विलक्षण स्वीकार किया है। नाट्यशिल्पी इन्द्र के समान होते हैं। नाट्याचार्य (दिग्दर्शक) भरत मुनि के समान होते हैं। अभिनेता कोहल आदि प्राचीन नटों के समान उन्ही के अनुयायी हैं। अभिनेत्रियां अप्सराओं के समान सुकुमार होती हैं। मृदङ्गादि अवनद्ध वाद्य-वादन कलाप्रवीण स्वाति जैसे मुनि उन्हीं के अनुयायी हैं। गायनाचार्य नारदमुनि-सदृश हैं। उससमय नाट्यमण्डप देवताओं से सुरक्षित हो चुका था। जिस समय पहला नाट्यप्रयोग सम्पन्न हुआ, वह इन्द्र ध्वज पूजनोत्सव का महान् अवसर था। उस समय असुर आदि दर्शकों में जो राग-द्वेष उत्पन्न हुआ था, उसे ब्रह्मदेव के सामवचनों ने शान्त कर दिया था।

यजनं रङ्गसंश्रयम्— साथ ही प्रथम नाट्यप्रयोग के पूर्व देवताओं की पूजा अर्चना द्वारा उन्हे प्रसन्न किया गया था। यह सब जानने के पश्चात् ही उन्हें रङ्गमंचसंबंधी यजन(हवन) विषयिणी जिज्ञासा हुई, जिसका उपक्रम प्रथमाध्याय में 'रङ्गपूजां कुरुष्व' इत्यादि द्वारा किया गया है। और यह प्रश्न भी मानवों से संबंधित है, देवताओं से नहीं।

साथ ही वह भविष्यकाल के मानवों से संवद्ध है, भूत अथवा वर्तमान के नहीं। इसी दृष्टि से **'भविष्यद्भिर्नरैः कार्यम्'** यह प्रयोग है।

अथवा याः क्रिया स्तत्र लक्षणं यच्च पूजनम्— रङ्गपूजां कुरुष्व इसमें पूजा शब्द प्रयुक्त है। इसमें दुवारा इसका प्रयोग उस पूजन की विधि क्या है, उसका सम्पादन किसप्रकार किया जाता है यह सब जानने के लिए है। **लक्षणं यच्च पूजनम्** इसमें **लक्ष्यते अनेन इति लक्षणम्** इस निर्वचन के द्वारा नाट्यमण्डप का सन्निवेश (रचना, आकार) और परिमाण सूचित हो रहा है, क्योंकि नाट्यमण्डप और उसकी अधिष्ठात्री देवता का पूजन सम्भव है।।१-२।।

इहादिर्नाट्ययोग[1]स्य नाट्यमण्डप एव हि[2] ।
तस्मात् तस्यैव तावत् त्वं लक्षणं वक्तुमर्हसि ।।३।।
तेषां तु वचनं श्रुत्वा मुनीनां भरतोऽब्रवीत् ।
लक्षणं पूजनं चैव श्रूयतां नाट्यवेश्मनः ।।४।।

अन्वयः—"हि इह नाट्ययोगस्य आदिः नाट्यमण्डपः एव, तस्मात् त्वं तस्य

१. वेदस्य—पा.।
२. कीर्तितो नाट्यमण्डपः—पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

लक्षणम् एव वक्तुम् अर्हसि।" भरतः तु तेषां मुनीनां वचनं श्रुत्वा अब्रवीत्–(भवद्भिः) नाट्यवेश्मनः लक्षणं पूजनं चैव श्रूयताम्।।३-४।।

अभिनव-भारती

पूर्वकृते प्रश्नपञ्चके निर्णयं कृत्वेदं प्रश्नान्तरं निर्णयेदित्याशङ्कमाना मुनयः पुनराहुरिहादिरिति। नाट्यस्य योग उत्पत्तिः। तावदित्यनेन पूर्वप्रश्नितस्याऽत्याग उक्तः। एवकारो लक्षणशब्दान्तरम्। इतिकर्तव्यतायाः तदङ्गत्वात्। यजनस्य च तन्निष्पत्यनन्तरत्वात्। तेषामिति। अन्यथा तु न ब्रूयादेवोक्ताद्धेतोः। अनेन श्लोकेन लक्षणपूजनज्ञानं देवनामप्युपयोगि। सङ्कल्पितस्याऽपि निर्माणस्य ज्ञानापेक्षित्वादित्युक्तम्। अत एवाऽत्र क्रियेति नोक्तम्।।३-४।।

तात्पर्य-दीपिका

भावार्थ–"यतः नाट्ययोग (नाट्य-सृष्टि) का प्रथम साधन नाट्य-मण्डप ही होता है, अत: आप उसका स्वरूप ही विवेचित कर सकते हैं।" उन जिज्ञासु मुनियों के जिज्ञासा-वचन को सुनकर भरतमुनि ने कहा–"आप सभी नाट्यमण्डप की परिभाषा और उसकी पूजन-विधि सुनें।।३-४।।

व्याख्या–प्रथमाध्याय (४-५) में निरूपित पांच प्रश्नों से यह भिन्न प्रश्न है। प्रस्तुत पद्य में प्रयुक्त 'नाट्ययोग' शब्द का अर्थ है नाट्य की सृष्टि। प्रस्तुत पद्य में प्रयुक्त 'एव' कार 'लक्षण' शब्द से सम्बद्ध है। 'नाट्ययोग' शब्द का अर्थ नाट्य की सर्जना से है, जिसका प्रयोग यह सूचित कर रहा है कि नाट्यमण्डप की रचना के बाद ही नाट्य, नाट्य-मण्डप और रंगदेवता की पूजा का विधान है। इस श्लोक में प्रतिपाद्य देवताओं का पूजन और हवन नाट्य-मण्डप के निर्माण के वाद ही सम्भव है, जो देवताओं के लिए भी उपयुक्त है।।३-४।।

दिव्या[1]नां मानसी सृष्टिर्गृहेषूपवनेषु च।
(यथाभावाभिनिर्वर्त्याः सर्वे भावास्तु मानुषाः)।
नराणां यत्नतः कार्या लक्षणाभिहिताः क्रियाः।।५।।
श्रूयतां तद् यथा यत्र[2] कर्तव्यो नाट्यमण्डपः।
तस्य वास्तु च पूजा च यथा योज्या प्रयत्नतः[3]।।६।।

अन्वयः–गृहेषु उपवनेषु च दिव्यानां मानसी सृष्टिः।(मानुषाः तु सर्वे भावाः यथाभावाभिनिर्वर्त्याः। नराणां लक्षणाभिहिताः क्रियाः यत्नतः कार्याः।) यथा यत्र नाटमण्डपः कर्तव्यः, तस्य वास्तु च पूजा च प्रयत्नतः यथायोज्या, तत् श्रूयताम्।।५-६।।

अभिनव-भारती

ननु किं क्रियै (या नै) वोच्यत इत्याह–दिव्यानामिति। श्रूयतामित्यनुवर्तते। नराणां कार्या क्रिया इतिकर्तव्यता च श्रूयताम्। चकाराल्लक्षणपूजने। शास्त्रेणोक्ता नराणामेव कस्मादित्याह–दिव्यानामिति। सृज्यमानत्वेन कर्मणोऽपि विषयत्ववि(त्वमेव) यत्र जन्मक्रमनियतप्ररोहकुसुमफलानि

१. देवानाम् – पा.।
२. तत्र – पा.।
३. तस्य दैवतपूजा च यथा योज्या च वास्तुपु – पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बहुविचित्रतरुलतास्थलीसरोवरक्रीडमयान्युपवनान्यपि मानसानि, तत्र गृहे का सम्भावनेति। श्रूयतामिति। तदिति। यतो नराणां यत्नतः कार्यताप्रकारः। यत्रेति देशकालौ। वास्त्विति। गृहभूतिगतं परिमाणमिह मन्तव्यम्। (पूजा) लक्षणोक्तेत्युक्तम्।।५।।६।।

तात्पर्य-दीपिका

भावार्थ–घर और घर के बगीचों में दिव्ययोनियों की मानसी सृष्टि होती है। (मनुष्ययोनि के प्राणियों के सभी भावों के क्रियाकलापों का सम्पादन उन भावों की परिभाषाओं के अनुसार करना चाहिए।)

इसलिए जिस स्थान में जिस समय जिस प्रकार नाट्यमण्डप की रचना करनी चाहिएं, उसकी वास्तु की योजना यथायोग्य तदनुसार ही करनी चाहिए और नाट्य-मण्डप की मुख्यदेवता तथा अन्य देवताओं को उन स्थानों पर प्रतिष्ठित कर तदनुसार प्रयत्नपूर्वक अनका पूजन भी करना चाहिए।।५।।६।।

व्याख्या–यह युग्मक है, क्योंकि **श्रूयताम्** इस क्रिया पद के **दिव्यानां मानसी सृष्टिः** इत्यादि अवान्तर वाक्य कर्मकोटि में हैं। अथवा **याः क्रियास्तत्र** (२/३) इत्यादि प्रश्न का समाधान भी इसमें समाहित है। नाट्य-प्रयोग में मानव-मात्र के क्रिया-कलापों के अभिनय का विधान इसलिए है कि दिव्ययोनियों के प्राणियों को क्रियाकलापों की आवश्यकता ही नहीं होती, वे संकल्पमात्र से सृष्टि कर सकते हैं–**दिव्यानां मानसी सृष्टिः**। वे जहां विहार करते हैं, वे घर-उपवन भी उन्हीं के केवल मानस-संकल्प से उत्पन्न होते हैं, उनके लिए उन्हें किसी भी प्रकार के प्रयास की आवश्यकता नहीं होती। '**तत्**' हेतुवाचक सर्वनाम है, जिसका अर्थ है "यतः 'मानव प्रयत्न से ही किसी अभीष्ट प्राप्ति में सफल होते हैं 'अतः' उनके क्रियाकलापों आदि के विषय में आप सुनें।' '**वास्तु**' का अर्थ है नाट्यमण्डप की भूमि का आकार-प्रकार, लम्बाई-चौड़ाई और उसका मानचित्र (नक्शा) आदि। पूजा का तात्पर्य पूजा की शास्त्रीय विधि है।।५।।६।।

इह प्रेक्षागृ[1]हं दृष्ट्वा धीमता[2] विश्वकर्मणा।
त्रिविधः सन्निवेशश्च शास्त्रतः परिकल्पितः।।७।।
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव तु[3] मण्डपः।
तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथाऽवरम्।।८।।
प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम्।
शतं चाऽष्टौ चतुःषष्टिर्द्वात्रिंशच्चेति निश्चितम्।।९।।

अन्वयः– धीमता विश्वकर्मणा इह शास्त्रतः प्रेक्षागृहं दृष्ट्वा तन्निवेशश्च त्रिविधः कल्पितः। मण्डपः तु विकृष्टः चतुरस्रः च त्र्यस्रः च एव। तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथा अवरम्। एषां प्रमाणं हस्तदण्डसमाश्रयं निर्दिष्टम्। तम् अष्टौ च चतुःषष्टि द्वात्रिंशत् च इति निश्चितम्।।७।।८।।९।।

अभिनव-भारती

तत्र किं तल्लक्षणमित्याह–इह प्रेक्षागृहमिति। इह नाट्यमण्डपे। सन्निवेशः।

१. प्रेक्षागृहाणां तु-पा.।
२. श्रीमता-पा.।
३. हि-पा.।
४. द्वात्रिंशच्चेति निश्चितः, हस्ता द्वात्रिंशदेव च-पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चशब्दात् प्रमाणमेतत्। विश्वकर्मणा परिकल्पितः। किं स्वबुद्ध्या? न, अपि तु शास्त्रतः प्रेक्षागृहं विचार्य। शक्तश्चाऽसौ विचार इत्याह–धीमतेति। ज्ञायत इत्याह। शास्त्रं कृतं तदप्यपरशास्त्रमूलमिति प्रवाहानादित्वमुक्तम्। कोऽसौ? त्रिविध इत्याह–विकृष्टश्चेति। विभागेन कृष्टो दीर्घो न तु चतसृषु दिक्षु साम्येन। तिस्रोऽस्त्रयो यस्य, त्र्यस्त्रि तदस्मिन्निति मत्वर्थीयोऽच्। एतान्येव त्रीणि ज्येष्ठादीनीति केचित्। अन्ये तु प्रत्येकं त्रित्वमिति नवैतेऽत्र भेदा इत्याहुः। एतदेव युक्तम्। तथा चाह–तेषामिति। प्रमाणं हस्तदण्डाश्रयं ज्येष्ठादित्वम्, न तु सन्निवेशाश्रयमिति यावत्।

शतं चाऽष्टौ चतुःषष्टिर्द्वात्रिंशच्चेति निश्चयात्

इति केचित् पठन्ति। तेषां चाऽस्ति(पि) हस्तदण्डसमाश्रयत्वं वाचकं भवति। एतच्च सर्वं सम्भवमात्रेणोच्यते, अनु(नानु) वादकतया। नत्वियन्तो भेदा उपयोगिनः। एवं चाऽष्टादश भेदास्तावच्छास्त्रे दृष्टाः। ते चाऽन्यत्वे(द्यत्वे) यद्यप्यनुपयोगिनः, तथाऽपि च सम्प्रदायाविच्छेदार्थं निर्दिष्टाः केषाञ्चित् कदाचिदुपयोगी भविष्यतीति। यथोक्तम्–अप्रयुक्ते दीर्घसत्रवत् इति। ।।७।।८।।९।।

तात्पर्य-दीपिका

भावार्थ–यहां पर प्रेक्षागृह को देखकर प्रतिभाशाली स्थापत्यवेत्ता विश्वकर्मा ने शास्त्रीय प्रमाणों के आधार पर तीन प्रकार की नाट्यशाला की परिकल्पना की–विकृष्ट, चतुरस्त्र और त्र्यस्त्र। साथ ही उनके तीन प्रमाण (आकार-प्रकार) निर्धारित किये और ज्येष्ठ, मध्यम और अवर ये तीन नाम उसी प्रमाण के आधार पर प्रदान किये। ये प्रमाण हाथ और दण्ड के आधार पर थे। कुछ नाट्य-मण्डप एक सौ आठ (१०८) हाथ और दण्ड के निर्धारित किये गए, कुछ चौंसठ (६४) हाथ और दण्ड वाले और कुछ बत्तीस(३२) हाथ और दण्ड के नाट्यमण्डप।

व्याख्या– इस विशेषक में नाट्यमण्डप के विभिन्न आकार-प्रकार निर्धारित किये गए हैं। भूमि पर नाट्यगृह का निर्माण किसप्रकार करना चाहिए, उसका आकार-प्रकार क्यां होना चाहिए, विश्वकर्मा ने वास्तुशास्त्र के आधार पर इस का निर्धारण किया, केवल अपनी बुद्धि से नहीं। यद्यपि वे धीमान्, प्रतिभाशाली थे। **धीमता विश्वकर्मणा शास्त्रतः प्रेक्षागृहं दृष्ट्वा (विचार्य)** इस पदावली का यही अर्थ है। विकृष्टश्चतुरस्त्र च त्र्यस्त्रश्चैव तु मण्डपः, नाट्यमण्डप अनेकविध हैं–

(१) कुछ 'विकृष्ट' नाट्यमण्डप होते हैं–**विभागेन कृष्टः दीर्घः विकृष्टः।** वह नाट्यशाला लम्बी होनी चाहिए। ऐसे आयताकार नाट्यमण्डप 'विकृष्ट' कहलाते हैं। उनका विभाग चारों दिशाओं में बराबरी का नही होना चाहिए।

(२) चतुरस्त्र–**चतुस्त्रः अस्त्रयः यस्य तत् चतुरस्त्रि, तत् अस्मिन्निति चतुरस्त्रः।** वर्गाकार नाट्यमण्डप 'चतुरस्त्र' कहलाते हैं।

(३) त्र्यस्त्र–**तिस्त्रः अस्त्रयः यस्य तत् त्र्यस्त्रि, तत् अस्मिन्निति इति त्र्यस्त्रः।** त्रिभुजाकार नाट्यमण्डप 'त्र्यस्त्र' कहलाते हैं। कुछ लोगों के अनुसार ज्येष्ठ, मध्यम और अवर ये तीन नाम यथाक्रम विकृष्ट, चतुरस्त्र और 'त्र्यस्त्र' नाट्यमण्डपों के हैं। किन्तु अन्य लोगों के अनुसार ज्येष्ठ, मध्यम और अवर नाट्यमण्डपों के तीन-तीन भेद होते हैं।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इस प्रकार इनके नौ(९) भेद हैं। नाप के विचार से ज्येष्ठ आदि प्रत्येक नाट्यमण्डप एक सौ आठ(१०८), चौंसठ(६४), और बत्तीस(३२) हाथ अथवा दण्डप्रमाण के होते हैं।

इस प्रकार नाट्यमण्डप के अठारह भेद होते हैं। अभिनवगुप्ताचार्य के समय भी इनके कुछ प्रकार अनुपयुक्त थे, तथापि उन्होनें 'अभिनव-भारती' में उनका निर्देश इसलिए किया कि शास्त्र का उच्छेद न हो और भविष्य में उसका उपयोग हो। उसके लिए उन्होनें एक उदाहरण प्रस्तुत किया–दीर्घसत्रवत्। 'सत्र' बारह वर्षों तक निरन्तर अखण्ड रूप से चलने वाले दीर्घावधि के यज्ञसमूह को कहते हैं। उनका संपादन सदा नहीं होता, अपितु कभी-कभी होता है। परन्तु शास्त्रों में उनका उल्लेख इसलिए आता है कि कभी उसका उपयोग किया जा सकता है। वह यज्ञानुष्ठान शास्त्रीय रीति से होना चाहिए। इसीप्रकार यहां नाट्यमण्डप की नानाविधाओं का उल्लेख किया गया है।।७।।८।।९।।

अष्टाधिकं शतं ज्येष्ठं चतुःषष्टिस्तु मध्यमम्।
कनीयस्तु तथा वेश्म हस्ता द्वात्रिंशदिष्यते[1] ।।१०।।
देवानां तु भवेत् ज्येष्ठं नृपाणां मध्यमं भवेत्।
शेषाणां प्रकृतीनां तु कनीयः संविधीयते ।।११।।

अन्वयः– अष्टाधिकं शतं हस्ताः ज्येष्ठं वेश्म इष्यते। चतुःषष्टिः हस्ताः तु मध्यमं वेश्म इष्यते। तथा द्वात्रिंशत् हस्ताः तु कनीयः वेश्म इष्यते। देवानां तु ज्येष्ठं भवेत्, नृपाणां तु मध्यमं भवेत्। शेषाणां प्रकृतीनां तु कनीयः वेश्म संविधीयते।।१०।।११।।

अभिनव-भारती

इदं त्विहोपयोगीति दर्शयति–**अष्टाधिकं शत**मित्यादि। **इष्यत** इति। अन्यत्वे(अद्यत्वे)पीत्याशयः। **देवाना**मिति। यत्र देवासुरप्राया एव नायक-प्रतिनायकास्तत्र डिमादावारभटीप्रधाने विततरङ्गपीठोपयोगात् भाण्डवाद्य-प्रधानत्वाच्च परिक्रमणादेरुच्चतरदीर्घतरदीर्घतालपरिग्रहादियोगाच्च व्यक्त-भावस्याऽसम्भवादष्टोत्तरशतहस्तो मण्डप इत्यर्थः। यस्तु व्याचष्टे प्रेक्षका अत्र देवादयो विवक्षिता न तु प्रयोज्याः, तेषां नियतसंख्याकत्वादिति। तस्याऽस्म-दभिप्रायो न स्मृतिपथमागतः सन्नपि दशरूपकादौ। स चाऽनन्तरमेव दर्शयिष्यते।।।१०-११।।

तात्पर्य-दीपिका

भावार्थ– **एक सौ आठ(१०८) हाथोंवाला नाट्यमण्डप ज्येष्ठ, चौंसठ (६४) हाथों वाला नाट्यमण्डप मध्यम और बत्तीस (३२) हाथोंवाला नाट्यमण्डप कनिष्ठ होता है। इनमें देवताओं का नाट्यमण्डप ज्येष्ठ, राजाओं का मध्यम और सर्वसाधारण जनता का नाट्यमण्डप कनिष्ठ होता है।।१०।।११।।**

व्याख्या– यह प्रमाण नाट्यमण्डप का है। नाट्यमण्डप वह होता है जहां नट देवादि का अभिनय करते हैं। प्रेक्षागृह उससे सटा होता है, जहां दर्शक बैठकर नाट्य-प्रयोगों का चाक्षुष-प्रत्यक्ष करते हुए उसका रसास्वाद करते हैं।

---

१. द्वात्रिंशत् करमिष्यते-पा.।
२. देवानां भवने ज्येष्ठं-पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम्

इस पूर्व-वचन के आधार पर हस्त शब्द दण्ड का भी उपलक्षण है। अर्थात् एक सौ आठ(१०८) हाथों के प्रमाण का विकृष्ट(आयताकार), चतुरस्र (वर्गाकार), और त्र्यस्र (त्रिभुजाकार) नाट्यमण्डप ज्येष्ठ होता है। चौंसठ (६४) हाथों के प्रमाण का विकृष्ट (आयताकार), चतुरस्र (वर्गाकार) और त्र्यस्र (त्रिभुजाकार) नाट्यमण्डप मध्यम होता है तथा बत्तीस (३२) हाथों के प्रमाण का विकृष्ट(दीर्घाकार), चतुरस्र(वर्गाकार) और त्र्यस्र (त्रिभुजाकार) नाट्यमण्डप अवर (कनिष्ठ) होता है। ज्येष्ठ नाट्यमण्डप विस्तृत होना चाहिए, क्योंकि वहां देवता आदि नायक प्रधान पात्र तथा असुर आदि प्रतिनायक पात्र होते हैं। आरभटीवृत्तिप्रधान 'डिम' आदि रुपक में विस्तृत रंगमंच उपादेय होता है। ('डिम' का लक्षण द्रष्टव्य ना० शा० २०/८८-९२)। भारती, सात्वती, कैशिकी और आरभटी इन चार प्रकार की वृत्तियों में डिम आरभटीप्रधान होता है, (द्र० ना० शा० २३/५६-६३)। इस आरभरी वृत्ति का प्रयोग वीभत्स और रौद्र रस में करने का विधान है। (द्र० ना० शा० २३/ ६६)। 'डिम' में प्रधान रूप से भाण्ड वाद्यों का प्रयोग होता है। उनके वादन में परिक्रमण (तिहाई आदि) के समय उच्चतर, (अत्यंत उच्च), दीर्घतर (अत्यंत दीर्घ) और दीर्घ तालों का प्रयोग करना पड़ता है। इन सब दृष्टि से ज्येष्ठ नाट्यमण्डप एक सौ आठ हाथों अथवा दण्डों के प्रमाण का होना चाहिए। जहां राजचरित्र मंचस्थ होते हैं, वे नाट्यमण्डप मध्यम चौंसठ(६४) हाथ के तथा सामान्य जनता का चरित्र जहां मंचस्थ होता है, वे बत्तीस (३२) हाथों के नाट्यमण्डप कनिष्ठ होते हैं।

कुछ लोग नाट्यमण्डप और प्रेक्षागृह के अन्तर को न समझ कर देव-राजा और साधारण जनता का संवंध उन पात्रों से नहीं जोड़ते अपितु दर्शकों से जोड़ते हैं और तदनुसार व्याख्या करते हैं। यद्यपि दश रूपकों की परिभाषा से यह अभिप्राय स्पष्ट परिलक्षित होता है, तथापि वे उस का मर्म नहीं समझते।।१०।।११।।

(प्रेक्षागृहाणां सर्वेषां प्रशस्तं मध्यमं स्मृतम् ।
तत्र पाठ्यं च गेयं च सुखश्राव्यतरं भवेत् ।।
प्रेक्षागृहाणां सर्वेषां त्रिप्रकारो विधिः स्मृतः ।
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव प्रयोक्तृभिः ।।
कनीयस्तु स्मृतं त्र्यस्रं चतुरस्रं तु मध्यमम् ।
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेदप्रयोक्तृभिः ।।)

अन्वयः–(सर्वेषां प्रेक्षागृहाणां प्रशस्तं मध्यमं स्मृतम् । तत्र पाठयं च गेयं च सुखश्राव्यतरं भवेत् । प्रयोक्तृभिः सर्वेषां प्रेक्षागृहाणां त्रिप्रकारः च विधिः स्मृतः- विकृष्टः, चतुरस्रः च, त्र्यस्रः च। त्र्यस्रं तु कनीयः स्मृतम्, चतुरस्रं तु मध्यमं स्मृतम्। नाट्यवेदप्रयोक्तृभिः तु विकृष्टं ज्येष्ठं विज्ञेयम्।)

तात्पर्य-दीपिका

व्याख्या–ये तीन प्रक्षिप्त पद्य हैं। इसपर अभिनवगुप्तपादाचार्य की व्याख्या नहीं है। इनका भावार्थ इसप्रकार है–

सभी प्रेक्षागृहों में मध्यम प्रेक्षागृह प्रशस्त होता है, क्योंकि उसमें पाठ्य और

CC-O. Jangamwadi Math Collection, Varanasi: An eGangotri Initiative

गेय का श्रावण प्रत्यक्ष अनायास सुखपूर्वक किया जाता है।

ततः पाठ्यं प्रयुञ्जीत षडलङ्कारसंयुतम्

पाठ्य का प्रयोग छः अलंकारों से युक्त होता है-(१) सप्त स्वर, (२) तीन स्थान, (३) चार वर्ण, (४) द्विविध काकु, (५) छः अलंकार और (६) छः अङ्ग। (द्र० ना० शा० १९/३७-५९)। गेय के अन्तर्गत आतोद्यविधान भी समाविष्ट है। (द्र० ना० शा० अ० २८- ३३)।

नाट्यप्रयोगकर्मियों ने सभी प्रकार के प्रेक्षागृहों के तीन प्रकार वर्णित किये हैं– विकृष्ट, चतुरस्र और त्र्यस्र। नाट्यवेद के प्रयोग-कर्मियों ने इनमें त्र्यस्र प्रेक्षागृह को कनिष्ठ चतुरस्र प्रेक्षागृह को मध्यम और विकृष्ट प्रेक्षागृह को ज्येष्ठ मण्डप स्वीकार किया है।

इससे यह स्पष्ट है कि जिस प्रकार नाट्य-मण्डप के भेद हैं, उसीप्रकार प्रेक्षागृह के भी भेद हैं। उनमें विकृष्ट (आयताकार) प्रेक्षागृह ज्येष्ठ होता है और त्र्यस्र (त्रिभुजाकार) कनिष्ठ। सभी दृष्टियों से मध्यम चतुरस्र (वर्गाकार) प्रेक्षागृह प्रशस्त माना जाता है, क्योंकि उसमें पाठ्य और गेय दोनों का अधिक आनन्द उठाया जा सकता है।

नाट्यमण्डप और प्रेक्षागृह में अन्तर यह है कि नाट्यमण्डप आज का रंगमंच है और प्रेक्षागृह नाट्यशाला (थियेटर)। नाट्यमण्डप हस्तप्रमाण के होते हैं और प्रेक्षागृह दण्डप्रमाण के। विकृष्ट, चतुरस्र और त्र्यस्र प्रेक्षागृहों में प्रत्येक प्रेक्षागृह १०८ दण्डप्रमाण, ६४ दण्डप्रमाण और ३२ दण्डप्रमाण होते हैं। इसको हम इसप्रकार भी समझ सकते हैं–

(१) ज्येष्ठ–विकृष्ट (दीर्घाकार)–१०८, ६४ और ३२ दण्डप्रमाण।
(२) मध्यम–चतुरस्र (वर्गाकार)–१०८, ६४, और ३२ दण्डप्रमाण।
(३) कनिष्ठ–त्र्यस्र (त्रिभुजाकार) १०८, ६४ और ३२ दण्डप्रमाण।

प्रमाणं यच्च निर्दिष्टं लक्षणं विश्वकर्मणा।
प्रेक्षागृहाणां सर्वेषां तच्चैव [1]हि निबोधत ।।१२।।
अणू रजश्च वालश्च लिक्षा यूका यवस्तथा।
अङ्गुलं च[2] तथा हस्तो दण्डश्चैव[3] प्रकीर्तितः ।।१३।।
अणवोऽष्टौ रजः प्रोक्तं तान्यष्टौ वाल उच्यते।
वालास्त्वष्टौ भवेल्लिक्षा यूका लिक्षाष्टकं भवेत् ।।१४।।
यूकास्त्वष्टौ यवो ज्ञेयो[4] यवास्त्वष्टौ तथाङ्गुलम्।
अङ्गुलानि तथा हस्तश्चतुर्विंशतिरुच्यते ।।१५।।
चतुर्हस्तो भवेद्दण्डो निर्दिष्टस्तु प्रमाणतः।
अनेनैव प्रमाणेन वक्ष्याम्येषां विनिर्णयम् ।।१६।।

अन्वयः– अणुः, रजः च, वालः च, लिक्षा, यूका, यवः तथा अङ्गुलं च, तथा हस्तः दण्डः चैव प्रकीर्तितः। अष्टौ अणवः रजः प्रोक्तम्। अष्टौ तानि बालः उच्यते। अष्टौ तु बालाः लिक्षा भवेत्। लिक्षाष्टकं यूका भवेत्। अष्टौ तु यूका यवः ज्ञेयः। तथा

१. एवं–पा.।
२. चैव हस्तश्च–पा.।
३. दण्डश्च परिकीर्तितः–पा.।
४. प्रोक्तः–पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अष्टौ यवाः तु अङ्गुलम्। तथा चतुर्विंशतिः अङ्गुलानि हस्तः उच्यते। प्रमाणतः निर्दिष्टः चतुर्हस्तः तु दण्डः भवेत्। (अहम्) अनेनैव प्रमाणेन एषां विनिर्णयं वक्ष्यामि।।१२-१६।।

अभिनव-भारती

प्रमाणं लक्षणं यन्निर्दिष्टमिति जातावेकवचनम्।

कानि प्रमाणानीत्याह–अणू रजश्चेत्यादिना। तेषां लक्षणान्याह–अणवोऽष्टावित्यादि। यतः प्रभृति दृश्यता प्रवर्तते सोऽणुः। प्रसिद्धोऽणु-परिमाणः। द्व्यणुकद्वयपरमाणुद्वयारब्धा अणव एव वा महत्त्वयुक्ताः। परमाणु-द्वयारब्धे तु द्व्यणुकेऽणुपरिमाणमस्तु। कोऽत्र विरोध इत्यलमवान्तरेण। अनेनैवेति। देवानां तु भवेत्' इत्यनेन यदुक्तम्। मण्डपाः–तद्यथा ज्येष्ठप्रमाणं डिमप्राये। यद् वक्ष्यति–

निर्घातोल्कापातैरुपरागेणेन्दुसूर्ययोर्युक्त ।
युद्धनियुद्धाघर्षणसम्फेटकृतश्च विज्ञेयः ।।
देवभुजगेन्द्रराक्षसयक्षपिशाचावकीर्णश्च ।
षोडशनायकबहुलः सात्त्वत्यारभटिकायुतस्तु डिमः ।।
(ना० शा० २०/९०-९२) इति ।

तथा मध्यमप्रमाणं नृपतिप्रायप्रयोज्ये नाटकादौ। यद्वक्ष्यति–'नृपतीनां यच्चरितम्।' (ना० शा० २०/१२) इत्यादि।

शेषास्तु प्रकृतयो भाणप्रहसनादौ। यच्च वक्ष्यति–

विविधाश्रयो हि भाणो विज्ञेयस्त्वेकहार्यस्तु ।
ना० शा० २०/११२)

तथा ''भगवत्तापसविप्रैरन्यैरपि च'' (ना० शा० २०/१०७) इत्यादि। एवंभूतप्रकृतिप्रधाने प्रयोगे कनीयःप्रमाणो मण्डपः इति। एषां मण्डपानां मध्ये यो विनिर्णय एव सर्वसाधारणः मध्यमे मण्डपे नाटकभाणप्रयोगात् कनीयसि च, डिमरूपे एव (ष) मण्डपं(पः) तं वक्ष्यामीति।

अयमभिप्रायः– ज्येष्ठमाने नाटकादिप्रयोगसौकर्याभावान्मध्यम एव युक्तः। स एव निर्णयः। विविधोऽपि दिव्यनृपप्रकृता (त्या) दिस्वभावो निश्चयाभिमुख्यमभिनय-प्रयोगद्वारेण नीयते यत्रेति।।१२-१६।।

तात्पर्य-दीपिका

भावार्थः– अणु, रज, बाल, लिक्षा, यूका, यव, अङ्गुल, हस्त और दण्ड ये नौ प्रमाण निर्धारित हैं। इन प्रमाणों(पैमानों) में आठ अणु बराबर एक 'रज'(धूलिकण), आठ 'रज' बराबर एक बाल, आठ बाल बराबर एक लिक्षा, आठ लिक्षा बराबर एक यूका, आठ यूका बराबर एक यव, आठ यव(जौ) बराबर एक अङ्गुल, चौबीस अङ्गुल बराबर एक हस्त (हाथ) और चार हाथ बराबर एक दण्ड इस प्रकार विभिन्न प्रमाणों के लक्षण निर्दिष्ट हैं। इन्हीं प्रमाणों (पैमानों) के आधार पर मण्डप निर्माण का निर्णय किया जा रहा है।।१२-१६।।

व्याख्या– प्राचीन काल में अणु से लेकर दण्ड तक प्राचीन प्रमाण(पैमाने) निर्धारित थे,इनका स्थान आज इंच, सेंटीमीटर, फुट, गज, मीटर आदि मानकों ने

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ले लिया है। अभिनवगुप्तपादाचार्य के अनुसार यद्यपि ये विविध प्रमाण हैं, तथापि **प्रमाणं यच्च निर्दिष्टम्** इत्यादि में प्रमाण शब्द का एकवचन में प्रयोग जाति के अर्थ में है। इनमें सबसे छोटा परिमाण 'अणु' है, जो दृश्य होता है। **यतः प्रभृति दृश्यता प्रवर्तते सोऽणुः।** कुछ लोगों के मतानुसार प्रसिद्ध अणु दृष्टिगोचर नहीं होता, क्योंकि वह अत्यंत सूक्ष्म होता है। द्वयणुक त्र्यणुक आदि उतने सूक्ष्म न होने के कारण दृष्टिगोचर होते हैं। यहां उसी 'अणु' से तात्पर्य है, न्यायप्रसिद्ध अणु से नहीं।

देवानां तु भवेद् ज्येष्ठम् (२/११) इत्यादि पद्य से नाट्यमण्डपों के तीन भेदों की ओर संकेत है–ज्येष्ठप्रमाण, मध्यमप्रमाण और कनिष्ठप्रमाण।

इनमें ज्येष्ठप्रमाण नाट्यमण्डप का उपयोग वहां होता है, जहां 'डिम' जैसे रूपक का मञ्चन किया जाता है। डिम में प्रसिद्ध कथावस्तु का मंचन होता है, उसका नायक प्रसिद्ध और उदान्तचरित होता है। शृंगार और हास्य-रस को छोड़कर शेष छः रसों से वह परिपूर्ण होता है। उसमें चार अंक होते हैं। उसमें निर्घात(?), चन्द्र और सूर्य का ग्रहण, उल्कापात, युद्ध, बाहुयुद्ध, एक दूसरे पर प्रहार, संफेट, माया, इन्द्रजाल आदि सभी का मंचन होता है। उसमें सोलह (१६) नायक होते हैं। देव-असुर-राक्षस-भूत-यक्ष-नाग आदि जातियों के पुरुषों के आख्यान भी साथ ही साथ चित्रित होते हैं उसमें सात्वती और आरभटी वृत्ति का प्रयोग होता है(द्र. ना. शा. २०/८८-९२)।

मध्यमप्रमाण नाट्यमण्डप में नाटकों का मंचन होता है, जहां राजाओं के चरित्र प्रस्तुत किये जाते हैं। इसके लिए नाटक-लक्षण द्रष्टव्य है(ना. शा. २०/१०-१२)।

कनिष्ठ प्रमाण नाट्यमण्डप में भाण, प्रहसन आदि रूपक भेदों का मंचन होता है, जहां सर्व साधारण जन का चरित्र प्रस्तुत किया जाता है। भाण का लक्षण इस प्रकार है–

आत्मानुभूतशंसी परसंश्रितवर्णनाविशेषश्च ।
विविधाश्रयो हि भागो विज्ञेयस्त्वेकहार्यश्च ।।
परवचनमात्मसंस्थं परवचनैरुत्तरोत्तरग्रथितैः ।
आकाशपुरुषकथितैरङ्गविकारैरभिनयेत् तत् ।।
धूर्तविटसंप्रयोगो नानावस्थान्तरात्मकश्चैव ।
एकाङ्की बहुचेष्टः सततं कार्यो बुधर्भाणः ।।
(ना. शा. २०/११२-११४)

उसीप्रकार दो प्रकार के प्रहसनों के लक्षण भी नाट्यशास्त्र में द्रष्टव्य हैं– शुद्ध और संकीर्ण(ना. शा. २०/१०६-१११)।

उक्त तथ्यों को ध्यान में रखकर अभिनव-भारतीकार

अनेनैव प्रमाणेन वक्ष्याम्येषां विनिर्णयम्

का विशिष्ट अर्थ इस प्रकार करते हैं–**अनेनैव प्रमाणेन एषां मध्ये यो विनिर्णयः एव मण्डपः, तं वक्ष्यामि।** इसका भाव यह है कि ज्येष्ठ, मध्यम और कनिष्ठ प्रमाण नाट्यमण्डपों के अंतर्गत ज्येष्ठ-प्रमाण नाट्य-मण्डप में नाटक आदि के मंचन की सुकरता नहीं होती। मध्यम-प्रमाण नाट्य-मण्डप में उनका तथा भाण-प्रहसनों का मंचन सुकरता से संभव है। अभिनवगुप्तपादाचार्य **'विनिर्णयः'** को मण्डप का

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विशेषण मानते हैं और उसका निर्वचन इस प्रकार करते हैं–(वि) 'विविधोऽपि दिव्यनृपप्रकृत्यादिस्वभावः (निः) निश्चयाभिमुख्यम् अभिनयप्रयोगद्वारेण नीयते यत्र सः विनिर्णयः (मध्यमप्रमाणः नाट्यमण्डपः)। इस निर्वचन के अनुसार यद्यपि नाट्यमण्डप विविध होते हैं और जिनमें दिव्यप्रकृति, राजप्रकृति और सर्वसाधारण-चरित्र अंकित होते हैं, तथापि नाट्यप्रयोग में अभिनयों के द्वारा जिसकी उपादेयता निर्धारित की जाती है, वह नाट्यमण्डप मध्यमप्रमाण ही है। उसमें त्रिविध प्रकृतियों का अभिनय सुकरता से किया जा सकता है, चाहे वह डिम हो, नाटक हो अथवा भाण, प्रहसन आदि अन्य रूपक-भेद हो।।१२-१६।।

चतुःषष्टिकरान् कुर्याद् दीर्घत्वेन तु मण्डपम्।
द्वात्रिंशतं च विस्तारान्मर्त्यानां यो भवेदिह[1] ।।१७।।
अत ऊर्ध्वं न कर्तव्यः कर्तृभिर्नाट्यमण्डपः।
यस्मादव्यक्तभावं हि तत्र नाट्यं व्रजेदिति[2] ।।१८।।
मण्डपे विप्रकृष्टे तु पाठ्यमुच्चारितस्वरम्[3]।
अनिस्सरणधर्मत्वाद्विस्वरत्वं भृशं व्रजेत्[4] ।।१९।।

अन्वयः– यः इह मर्त्यानां मण्डपं भवेत्, (तं) दीर्घत्वेन चतुःषष्टिकरान् विस्तारात् च द्वात्रिंशतं कुर्यात्। कर्तृभिः अत ऊर्ध्वं नाट्यमण्डपः न कर्तव्यः। यस्मात् हि तत्र नाट्यम् अव्यक्तभावं भवेत् इति। विप्रकृष्टे तु मण्डपे उच्चारितस्वरं पाठ्यम् अनिस्सरणधर्मत्वात् भृशं विस्वरत्वं व्रजेत् ।।१७-१९।।

अभिनव-भारती

तं दर्शयति–चतुष्षष्टिं करानित्यादि। प्रयोक्तुः पुरस्तात् पृष्ठतश्च मण्डपेऽस्मिन् सति(पोऽस्मिन्नसति) करणार्हो न भवतीत्यर्थः। **कर्तृभिरिति**। किं तेषां वृथा प्रयासोत्पादनेनेति यावत्। **तत्रेति**। अतोऽधिकप्रमाणे अत्यन्तं न्यूनप्रमाणे चेत्यर्थः। **नाट्यमिति**। सकलावान्तरभेदे प्रभेदं दर्शयितुम्। नाट्यतोऽभि (ट्यं यतोऽभि) व्यक्तं भवतीति समुदायाभिप्रायेण मन्तव्यम्। तदेव दर्शयति–**मण्डप इति**। दीर्घत्वम्। पार्श्वयोर्विस्तारः। **मर्त्यानामित्यनेन** मण्डपकरणात् किमित्यकारणं प्रयोगेणैव (गो नैव) वेद्यत इत्याशयः। एतदेवाह– **अत ऊर्ध्वं नेति**। अत इत्येवंविधो यतो मध्यमोऽस्ति ततो हेतोरित्यर्थः। **ऊर्ध्वमिति**। प्रमाणस्याऽऽधिक्यं न्यूनातिरेकाभ्यामिति मन्तव्यम्। **कर्तव्य इति**। प्रकर्षः प्रकृष्टं तदतिक्रान्तो विप्रकृष्टः। किन्नियोगमानः तस्मिंश्च तत्र ज्येष्ठे। पाठ्यं यन्मुख्ये(ख्यं) **नाट्यस्यैषा तनूस्स्मृता** (ना. शा. १४-२) इति दर्शयिष्यते। तद्विस्वरत्वं विशेषेणोपतापकत्वं निकटवर्तिनः प्रति व्रजेत्। अत्र हेतुः उच्चं कृत्वा चारितोऽतिक्लेशेन सम्पादितः स्वरः काक्वादिविभागो यत्र। तथा दूरवर्तिनः सामाजिकान् प्रति विस्वरत्वं विगतशब्दकत्वमनाकर्णनीयत्वं व्रजेत्। अत्र हेतुः अनिस्सरणधर्मत्वात्। निरन्तरे देशे सरणं द्वितीयशब्दारम्भः। स यस्य धर्मो

१. द्वात्रिंशतं च विस्तारं मर्त्यानां योजयेदिह, द्वात्रिंशेन तु।
२. भवेदिति।
३. उच्चरितः।
४. अनभिव्यक्तवर्णत्वात् विस्तरत्वं भृशं भवेत्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नाऽस्ति शब्दान्तरप्रसराभावादित्यर्थः। तथाऽतिकनीयसि मण्डपे पाठ्यमुच्चारितस्वरं सदनिस्सरणधर्मत्वादनुरणनात्मकमधुरशब्दान्तरानारम्भात् विनष्टः स्वरो मधुरो यस्य तादृशत्वं व्रजेत्। अनुरणनं हि स्वरस्य पाठ्यसिद्धिरूपमिति गेयाधिकारे वक्ष्यामः। अनेन समानयोगक्षेमत्वात् अधिकातोद्यविस्वरत्वमपि लक्षितं भवति। तथा चोपसंहरिष्यति गेयं चेति। विस्वरत्वमिति 'स्वृ-शब्दोपतापयोः' इत्यस्य रूपम्। ।।१७-१९।।

तात्पर्य-दीपिका

भावार्थ– जो यहां मृत्युलोक के निवासी प्रेक्षकों के लिए नाट्य-मण्डप हो, उस मण्डप का निर्माण लम्बाई में ६४ (चौंसठ) हाथ और चौड़ाई में ३२ (बत्तीस) हाथ करना चाहिए। स्थापत्यवेत्ताओं को इससे छोटा या बड़ा मण्डप नहीं बनाना चाहिए, क्योंकि वहां दर्शक लोग नाट्य-प्रयोग का उतना स्पष्ट अनुभव नहीं कर सकते। मण्डप के अत्यन्त विस्तीर्ण होने पर जोर से किया जानेवाला पाठ्य-स्वरों का उच्चारण खराब लगेगा, क्योंकि वे शब्द दूर के बैठे हुए सामाजिकों तक पहुंच नहीं सकते। ।।१७-१९।।

व्याख्या–मध्यम प्रमाण नाट्यमण्डप का विस्तार और आयाम मृत्युलोक के निवासियों के लिए उपयुक्त है, उसका विवेचन इस विशेषक में है। वह नाट्यमण्डप प्रयोगकर्मी के सम्मुख और पीछे की ओर लम्बाई में चौंसठ(६४) हाथ और अगल-बगल की चौड़ाई में बत्तीस(३२) हाथ होना चाहिए। उसमें विविध प्रकार के रूपकों का मञ्चन उपयुक्त होता है, अन्यथा वह प्रयास व्यर्थ है। इसलिए इससे बड़ा अथवा छोटा नाट्यमण्डप नहीं बनाना चाहिए। क्योंकि वहां सभी प्रकार के रूपकों का मंचन करने से उसकी अनुभूति सामाजिकों को स्पष्ट रूप से नहीं होगी। यदि नाट्यमण्डप अत्यन्त विस्तीर्ण हो, तो पाठ्य वहां अपस्वर होगा, क्योंकि वहां उसका जोर से उच्चारण करने पर भी प्रेक्षक और श्रोता दूर होने से वह ध्वनि-परंपरा उन तक पहुंचेगी ही नही और वे उसे सुन नहीं सकेंगे। छोटा नाट्यमण्डप होने पर पाठ्य का उच्च स्वर से उच्चारण कर्णकटु होगा, क्योंकि वह ध्वनि-परंपरा परस्पर टकराएगी और स्वर-माधुरी को नष्ट करेगी।

पाठ्य दो प्रकार का होता है–संस्कृत और प्राकृत।

व्यञ्जनानि स्वराश्चैव सन्धयोऽथ विभक्तयः ।
नामाख्यातोपसर्गाश्च निपातस्तद्धितास्तथा ।।
एतैरङ्गविधानैस्तु नानाधातुसमाश्रयम् ।
विज्ञेयं संस्कृतं पाठ्यम् (ना.शा. १५/५-६)

इत्यादि द्वारा संस्कृत पाठ्य का विवेचन वाचिक अभिनय के अन्तर्गत पन्द्रहवें अध्याय में, प्राकृत पाठ्य का विवेचन भाषाविधान नामक अठारहवें अध्याय तथा पाठ्य-गुण का प्रतिपादन काकुरचर-व्यञ्जन नामक उन्नीसवें अध्याय में किया गया है।

नाट्य के तीन गुण हैं–पात्र, प्रयोग और अर्थ। उनमें प्रयोग के चार आधार हैं–सुबोधता, सुगानत्व, सुषाठ्यत्व और शास्त्रकर्मसमायोग। स्वर का अनुरणन पाठ्य-सिद्धिस्वरूप है, जिसका विस्तार अठ्ठाइसवें अध्याय में है। जब अनुरणन अर्थात् ध्वनि-प्रतिध्वनि-परंपरा विशृंखलित होती है, तब स्वर माधुर्य-नष्ट हो जाता है। अधिक वाद्यों का प्रयोग भी स्वरमाधुरी नष्ट करता है, चाहे वे वंशवाद्य हों, तंत्री-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वाद्य हों अथवा तालवाद्य हों। ।।१७-१९।।

यश्चाऽऽप्याऽऽस्यगतो भावो नानादृष्टिसमन्वितः[१] ।
स वेश्मनः प्रकृष्टत्वाद् व्रजेदव्यक्ततां पराम् ।।२०।।
प्रेक्षागृहाणां सर्वेषां तस्मान्मध्यममिष्यते ।
यावत् पाठ्यं च गेयं च तत्र श्रव्यतरं भवेत्[२] ।।२१।।

अन्वयः– नानादृष्टिसमन्वितः यश्चाऽपि आस्यगतः भावः, सः वेश्मनः प्रकृष्टत्वात् पराम् अव्यक्ततां व्रजेत्। तस्मात् सर्वेषां प्रेक्षागृहाणां (मध्ये) मध्यमम् इष्यते। यावत् पाठयं च गेयं च तत्र श्रव्यतरं भवेत् । ।।२०।।२१।।

अभिनव-भारती

प्रधानस्य पाठ्यस्य प्रधानानुरणनभूतस्य च गीतातोद्यादेर्विनाशं प्रतिपाद्याऽभिनयवर्गस्याऽपि प्रतिपादयति–यश्चापीति। आस्यगतो मुखगतो भावः योऽनुभावलक्षणो दृष्टिवाप्पस्वेदवैवर्ण्यादिः तथा मकुटप्रतिशीर्षादिः। चकारादाङ्गिकः। स वेश्मनः प्रकृष्टत्वादतिविस्तीर्णत्वादव्यक्ततां गच्छेत्। तथा प्रगतं कृष्टं कर्षणं दैर्घ्यं यस्य तस्य भावः। ततः कनीयस्त्वाद्धेतोः परां द्वितीयामव्यक्ततामतिसामीप्यकृतां व्रजेत्। प्रथमं ह्यतिदूरत्वं कृत्वा सोक्ता। एवमुभयमण्डपाभिप्रायेणेदं व्याख्येयम्। अन्यथा तस्मान्मध्यममिष्यत इत्युपसंहारो न श्लिष्यति। तदाह–प्रेक्षागृहाणामित्यादि। मध्ये भवं मध्यमम्। तदिष्यते, यतः सर्वेषां रूपाणां सम्बन्धि यत् पाठ्यं प्रधानं तनूरूपप्राणोपरञ्जकरूपं च गीतं चकारादातोद्यं च श्रव्यतरं भवति। द्वितीयचकारादभिनयान्तरमपि दृश्यतरं भवतीत्यर्थः।।।२०-२१।।

तात्पर्य-दीपिका

भावार्थ–विविध दृष्टियों से परिपूर्ण मुख (चेहरे) का जो भाव होता हो, यदि नाट्यमण्डप विस्तीर्ण हो, तो सामाजिकों को उसकी अभिव्यक्ति अत्यंत अस्पष्ट होगी। इसलिए सभी प्रेक्षागृहों के बीच मध्यमप्रमाण नाट्यमण्डप अभीष्ट होता है, क्योंकि वहां प्रयुक्त पाठ्य और गेय अत्यंत स्पष्ट सुनाई पड़ता है।।२०-२१।।

व्याख्या–पूर्व पद्यों द्वारा ज्येष्ठ-प्रमाण नाट्य-मण्डप में वाचिक अभिनय के अन्तर्गत प्रयुक्त पाठ्य-गीत और वाद्यों की अश्राव्यता का प्रतिपादन किया गया है। इस युग्मक में अभिनय की अस्पष्ट अभिव्यक्ति का प्रतिपादन है। अन्य आङ्गिक, आहार्य और सात्विक अभिनयों में आहार्य और सात्विक अभिनय किसी प्रकार दृश्य हो सकते हैं। आंगिक अभिनय त्रिविध होता है–(१) शरीर का अभिनय, जिसमें शिर, हस्त, कटि, वक्ष, पार्श्व और पाद का अभिनय समाहित है। (२) दृष्टि का अभिनय, जिसमें रस, और भावों के अनुरूप विभिन्न अभिनय प्रविष्ट हैं। (३) मुख का अभिनय, जिसमें भ्रू, नासिका, कपोल, चिबुक, ओष्ठ, ग्रीवा आदि का अभिनय आता है। इनका विस्तार आठवें से दसवें अध्याय तक किया गया है। यदि नाट्यमण्डप अत्यंत विस्तीर्ण हो, तो दूर बैठे हुए साधारण जन उसका सूक्ष्मातिसूक्ष्म प्रत्यक्ष नहीं कर सकते और कनिष्ठप्रमाण नाट्य-मण्डप में भी अत्यंत समीपता के कारण उसकी

१. यश्चाऽप्यास्यगतो रागो भावसृष्टिरसाश्रयः, यश्चाऽप्यस्य–पा.।
२. यस्माद् वाद्यं च गेयं च सुखं श्राव्यतरं भवेत्–पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्पष्ट अभिव्यक्ति नहीं होती। जैसा कि सांख्यकारिका कार ने वस्तु की अनुपलब्धि में अतिदूर और सामीप्य को हेतु माना है–अतिदूरान् सामीप्यात्। वहां संस्कृत और प्राकृत द्विविध पाठ्य, गीत-वाद्य आदि अत्यंत सुश्राव्य होंगे। और सर्वविध अभिनय अत्यंत दृश्य होंगे।।२०।।२१।।

(प्रेक्षागृहाणां सर्वेषां त्रिप्रकारी विधिः स्मृतः।
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव प्रयोक्तृभिः।।
कनीयस्तु स्मृतं त्र्यस्रं चतुरस्रं च मध्यमम्।
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेश्म प्रयोक्तृभिः।।)

अन्वयः–प्रयोक्तृभिः सर्वेषां प्रेक्षागृहाणां विधिः त्रिप्रकारः स्मृतः – विकृष्टश्च, चतुरस्रश्च, त्र्यस्रश्चैव। प्रयोक्तृभिः त्र्यस्रं नाट्यवेश्म तु कनीयः स्मृतम् चतुरस्रं च नाट्यवेश्म मध्यमं स्मृतम्। विकृष्टं नाट्यवेश्म ज्येष्ठं विज्ञेयम्।

तात्पर्य-दीपिका

भावार्थ– नाट्य-प्रयोगकर्मियों ने सभी प्रकार के प्रेक्षागृहों के तीन भेद विवेचित किये हैं–विकृष्ट, चतुरस्र और त्र्यस्र। इनमें त्र्यस्र (त्रिभुजाकार) नाट्य-मण्डप को कनिष्ठ, चतुरस्र (वर्गाकार) नाट्य-मण्डप को मध्यम और विकृष्ट (आयताकार) नाट्यमण्डप को ज्येष्ठ कहा है।

व्याख्या– ये नाम प्रमाण के आधार पर हैं, श्रेष्ठता को ध्यान में रखकर नहीं। उक्त दोनों पद्य पुनरावृत्त और प्रक्षिप्त हैं। इसपर अभिनवगुप्तपादाचार्य की व्याख्या नहीं है।

देवानां मानसी सृष्टिगृहेषूपवनेषु[1] च।
यत्नभावां[2]भिनिष्पन्नाः सर्वे भावा हि[3] मानुषाः।।२२।।
तस्माद् देवकृतैर्भावैर्न विस्पर्धेत मानुषः।
मानुषस्य[4] तु गेहस्य सम्प्रवक्ष्यामि लक्षणम्।।२३।।

अन्वयः–गृहेषु उपवनेषु च देवानां मानसी सृष्टिः। हि मानुषाः सर्वे भावाः यात्नभावाभिनिष्पन्नाः। तस्मात् मानुषः देवकृतैः भावैः न विस्पर्धेत। मानुषस्य तु गेहस्य लक्षणं सम्प्रवक्ष्यामि। ।।२२।।२३।।

अभिनव-भारती

ननु यद्येवंभूतः प्रयोगक्रमस्तर्हि हस्तसमाश्रयेणैव विधिर्वक्तव्यः। सोऽपि यत्र परिपूर्णो नोपकारी, तत्र दण्डसमाश्रयेणाऽऽतोद्यमानेन। अथ कदाचिद् दिव्यप्रकृतिप्रेक्षकाभिप्रायेण तदुच्यते, तत्रापि कः स्तोकान्तरत्वेनेति न्यायेन का इति(ह) सम्भावनेत्याशङ्क्यां पराकर्तु श्लोको भावी। अत एव पूर्वश्लोकेन सह नाऽत्र पौनरुक्त्यं शङ्कितव्यम्। तस्याऽन्यथोपक्षेपात्। तच्छ्लोकमाह–देवानामित्यादि। मनसस्तदीयस्य सत्त्वबहुलत्त्वात् तत्कृत इन्द्रियविसर्जनलक्षणे व्यापारोऽतिरूपव्यापी। उपवनेष्वपि विततवितततेषु। का कथा मण्डपविषये। अत एव गृहेष्विति बहुवचनमुपात्तम्। तेन तदपेक्षया ते मण्डपा उक्ता इत्यर्थः।

१. वनेषु।
२. यत्नभावाद् विनिष्पन्नाः
३. हि।
४. मनुष्यस्य।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

न त्वेवं मानुषाणां राजसानां मनः। तदाह–देवकृतैरिति। यत एव तस्मान्मानुषस्यैव गेहस्य लक्षणं सम्यक् प्रवक्ष्यामि। तुशब्द एवकारार्थे।।२२।।२३।।

तात्पर्य-दीपिका

भावार्थ–यतः देवताओं की सृष्टि, चाहे वे घरों के सम्बन्ध में अथवा उपवनों के सन्दर्भ में हो, वह मानस-संकल्प से होती है। किन्तु मनुष्यों के सभी प्रकार के भाव प्रयत्नपूर्वक मूर्तरूप लेते हैं। अतः मनुष्य देवताओं के भावों से स्पर्धा न करे। मैं (भरतमुनि) मनुष्यों के लिए उपयुक्त नाट्यमण्डप का लक्षण कहता हूं। ।।२२।।२३।।

व्याख्या–नाट्यमण्डप के निर्माण का प्रकार मानव-दर्शकों की दृष्टि से विवेचित है। अब यह आशंका उपस्थित होती है कि डिम आदि रूपकों के मंचन की दृष्टि से उक्त विवेचन हो तो हस्त-प्रमाण से नाट्यमण्डप की रचना वर्णित की जानी चाहिए। अथवा यदि वह भी उपयुक्त न हो, तो वाद्यसंरचना की दृष्टि से दण्ड-प्रमाण नाट्य- मण्डप का विवेचन करना चाहिए। यदि दिव्य-प्रकृति प्रेक्षकों के लिए वह मण्डप हो, तो वह उससे थोड़ा बड़ा होना चाहिए। इन्हीं आशंकाओं का निराकरण इस युग्मक में है। अत एव **'दिव्यानां मानसी सृष्टिः'** इत्यादि पूर्व पद्य की पुनरावृत्ति पिष्टपेषण मात्र न होकर अभिनव-अर्थ-सम्पादन के लिए है। जहां वे विहार करते हैं, देवताओं के वे प्रासाद और उपवन अत्यंत विस्तृत होते हैं। केवल नाट्यमण्डप की बात छोड़िए। वे भी अनायास मानस-संकल्पजन्य होते हैं, एतदर्थ उन्हे कोई भी प्रयत्न नहीं करना पड़ता। मनुष्यों का मानस-संकल्प तभी सिद्ध होता है, जब वे प्रयत्नशील हों। अतः मनुष्यों द्वारा देवताओं के साथ किसी भी प्रकार की स्पर्धा नहीं करनी चाहिए।

दिव्यप्रकृति प्रेक्षकों के उपयुक्त नाट्यमण्डप निर्माण मनुष्यों की कल्पना-शक्ति से परे है, अतः केवल मानव-प्रेक्षकों के नाट्य-मण्डप की निर्माणविधि यहां विवेचित होंगी यही इसका अभिप्राय है। ।।२२।।२३।।

भूमेर्विभागं पूर्वं तु परीक्षेत प्रयोजकः[1] ।
ततो वास्तु प्रमाणेन[2] प्रारभेत शुभेच्छया ।।२४।।

अन्वयः – प्रयोजकः पूर्वं तु भूमेः विभागं परीक्षेत, ततः शुभेच्छया प्रमाणेन वास्तु प्रारभेत।।२४।।

अभिनव-भारती

सम्यगिति यदुक्तं तदाह–भूमेरित्यादि। विभागो हेयोपादेयत्वेन। वास्त्विति। ग्रहणं प्रमाणं चेत्युपलक्ष्यमाणरूपेण प्रारभेत। कर्तुमिति शेषः।।२४।।

तात्पर्य-दीपिका

भावार्थ– नाट्यमण्डप के निर्माण के प्रयोजन से भूमि-ग्रहणकर्ता सर्वप्रथम भूमि की परीक्षा करे और उसके पश्चात् अपने कल्याण की कामना से उस वास्तुभूमि की नाप-जोख करना प्रारंभ करे।।२४।।

व्याख्या– पूर्व पद्य में **सम्प्रवक्ष्यामि** का अर्थ है– **सम्यक् कथयिष्यामि**, 'मानव-प्रेक्षक के लिए उपादेय नाट्य-मण्डप की रचना विधि अच्छी प्रकार कह रहा हूँ।'

१. विचक्षणः-पा.।
२. वास्तु प्रमाण-पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उसी का विवेचन इन पद्यों में है। नाट्यमण्डप के लिए ली जानेवाली भूमि की विभागशः परीक्षा इसलिए करनी चाहिए, कि कौन सी भूमि उपादेय है और कौन सी त्याज्य। 'प्रमाणेन' का अर्थ केवल प्रमाण से न होकर भूमि-ग्रहण से भी है। अर्थात् विभागशः भूमि की उपादेयता को निश्चित कर तदनुसार उसका ग्रहण और तदुपरांत उसकी नापजोख कर नाट्यमण्डप के निर्माण का प्रारंभ करना चाहिए। कर्तुम् इस पद के अध्याहार से यह अर्थ सम्भव है।।।२४।।

समा स्थिरा तु कठिना कृष्णा गौ[1]री च या भवेत् ।
भूमिस्तत्रैव[2] कर्तव्यः कर्तृभिर्नाट्यमण्डपः ।।२५।।
प्रथमं शोधनं कृत्वा लाङ्गलेन समुत्कृषेत् ।
अस्थिकीलकपालानि तृणगुल्मांश्च शोधयेत् ।।२६।।

अन्वयः – या भूमिः समा स्थिरा कठिना कृष्णा गौरी च भवेत्, तत्रैव कर्तृभिः नाट्यमण्डपः कर्तव्यः। प्रथमं शोधनं कृत्वा लाङ्गलेन समुत्क्षेत्। अस्थिकीलकपालानि तृणगुल्मान् च शोधयेत्। ।।२५।।२६।।

अभिनव-भारती

तं विभागमाह–समेत्यादि। समा स्वभावान्नातिनिम्नोन्नतेत्यर्थः। स्थिरा अचलनस्वभावा। कठिना अनूपरा। कृष्णा गौरी चेति। चो वाऽर्थे। अन्ये तु व्यामिश्रितत्वमाहुः। कर्तव्य इति करणार्हः। कथमित्याह–प्रथममित्यादि। शोधनमुपरिगताशुचिशर्करा‌द्यपसारणम् । ततो हलेनोद्धृतगुल्मपाषाणादिकां कुर्यात्। एतदेवाह–अस्थीत्यादिना।।२५।।२६।।

तात्पर्य दीपिका

भावार्थ– जो भूमि समतल, स्थिर, मजबूत, काली या सफेद मिट्टी की हो; निर्माणकर्ता उसी भूमि पर नाट्यमण्डप का निर्माण कर सकते हैं। सर्वप्रथम भूमि-शोधन कर उसपर हल चला कर उस पर बिखरी हड्डियों, कीलों, खप्पड़, घास-फूस झाड़-झंखाड़ को वहां से हटा देना चाहिए।।२५-२६।।

व्याख्या–भूमि का विभाग किसप्रकार करना चाहिए और उसका शोधन किसप्रकार करना चाहिए इसका विवेचन इस युग्मक में है। वह जमीन समतल होनी चाहिए, ऊबड़-खाबड़ नहीं होनी चाहिए। वह स्थिर होनी चाहिए अर्थात् हिलने-डुलनेवाली नहीं होनी चाहिए। वह कठिन अर्थात् मजबूत होनी चाहिए, धंसने वाली नहीं होनी चाहिए। उसकी मिट्टी चाहे जैसी हो सकती है–सफेद या काली। क्योंकि यहां 'च' कार समुच्चयवाचक न होकर विकल्पवाचक है। कुछ लोगों के अनुसार उसमें सफेद और काली दोनों मिट्टी मिली होनी चाहिए। इन सबकी परीक्षा कर भूमिग्रहण करना चाहिए। फिर भूमि का शोधन करना चांहिए। प्रथम ऊपर बिखरे कंकड़-पत्थर आदि को हटा देना चाहिए और अनन्तर हल चला कर भीतर पड़ी हुई हड्डियाँ-झाड़-झंखाड़ आदि की सफाई करनी चाहिए। इसके बाद ही वहां पर नाट्यमण्डप बनाया जा सकता है, उसके पूर्व नहीं, यही 'कर्तव्यः' का अर्थ है। ।।२५।।२६।।

शोधयित्वा वसुमतीं प्रमाणं निर्दिशेत् ततः ।

१. कृष्णाऽगौरी-पा.।
२. तत्र तु-पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(त्रीण्युत्तराणि सौम्यं च विशाखापि च रेवती ।।
हस्ततिष्यानुराधाश्च प्रशस्ता नाट्यकर्मणि ।)
पुष्यनक्षत्रयोगेन[1] शुक्लं सूत्रं प्रसारयेत् ।।२७।।
कार्पासं वाल्बजं वापि मौञ्जं वाल्कलमेव च[2] ।
सूत्रं बुधैस्तु कर्तव्यं यस्य च्छेदो न विद्यते ।।२८।।
अर्धच्छिन्ने भवेत् सूत्रे स्वामिनो मरणं ध्रुवम् ।
त्रिभागच्छिन्नया रज्ज्वा राष्ट्रकोपो विधीयते ।।२९।।
छिन्नायां तु चतुर्भागे प्रयोक्तुर्नाश उच्यते ।
हस्तात् प्रभ्रष्ट[3]या वाऽपि कश्चित् त्वपचयो भवेत् ।।३०।।
तस्मान्नित्यं प्रयत्नेन रज्जुग्रहणमिष्यते ।
कार्यं चैव प्रयत्नेन मानं नाट्यगृहस्य तु ।।३१।।
मुहूर्तेनाऽनुकूलेन तिथ्या सुकरणेन च[4] ।
ब्राह्मणांस्तर्पयित्वा तु[5] पुण्याहं वाचयेत् ततः ।।३२।।

अन्वयः – वसुमतीं शोधयित्वा ततः प्रमाणं निर्दिशेत् ।(त्रीणि उत्तराणि, सौम्यं च, विशाखा, अपि च रेवती हस्त-तिष्याऽनुराधाः च नाट्यकर्मणि प्रशस्ताः।) पुष्यनक्षत्रयोगेन शुक्लं सूत्रं प्रसारयेत्। बुधैः तु कार्पासं वाल्वजं वाऽपि वाल्कलम् एव च सूत्रं कर्तव्यम्, यस्य च्छेदः न विद्यते। सूत्रे अर्द्धच्छिन्ने सति स्वामिनः मरणं ध्रुवं भवेत्। त्रिभागच्छिन्नया रज्ज्वा राष्ट्रकोपः विधीयते। चतुर्भागे च्छिन्नायां तु प्रयोक्तुः नाशः उच्चते। हस्तात् प्रभ्रष्टया वाऽपि कश्चित् तु अपचयः भवेत्। तस्मात् नित्यं प्रयत्नेन रज्जुग्रहणम् इष्यते। प्रयत्नेन तु नाट्यगृहस्य मानं कार्यम्। ततः मुहूर्त्तानुकूलेन तिथ्या सुकरणेन च ब्राह्मणान् तर्पयित्वा पुण्याहं वाचयेत् । ।।२७-३२।।

अभिनव-भारती

एवं वाह्याभ्यन्तरतो भूमिशुद्धिं निरूप्याऽनन्तरकरणीयमाह–शोधयित्वेति। कथं प्रमाणनिर्देश इत्याह–पुष्येति। शुक्लसूत्रत्वं तावत् पिष्टरञ्जनादिना। चर्मकृतं मानसूत्रं न कार्यमिति च तात्पर्यम्। स्वामिनः प्रेक्षापतेः। प्रयोक्तुर्नाट्याचार्यस्य। प्रयत्नेन रज्जुग्रहणमित्यच्छेद्यानुभरणीया। तादृशी च सावधानतयाऽवष्टम्भ-वियोगाद्युभयथा तथा प्रयत्नतो योज्यम्। नित्यमिति। न केवलमत्र प्रथमपरिग्रहे यावदन्यभाविस्तम्भविनिवेशाय भूभागमानग्रहणा दावित्यर्थः। प्रयत्नेन मानमित्यूनाधिकादिदोषवर्जनायाऽयं यत्न इत्यपौनरुक्त्यम्। मुहूर्तो ब्राह्मादिः। तिथिर्हदा(र्नन्दा)दिः। करणं विष्ट्यादिरहितम्।।२७-३२।।

तात्पर्य-दीपिका

भावार्थः–भूमि-शोधन के पश्चात् जमीन की नापजोख करनी चाहिए। (इसके लिए तीन उत्तरा(उत्तराषाढ़ा, उत्तराभाद्रपदा और उत्तराफाल्गुनी) सौम्य(मृगशिरा), विशाखा,

१. योगे तु-पा.।
२. वादरं चापि वाल्कलं मौञ्जमेव च-पा.।
३. हस्तप्रभ्रष्टया-पा.।
४. तिथ्या च करणेन च-पा.।
५. तु-पा.।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रेवती, हस्त, तिष्य(पुष्य) और अनुराधा नक्षत्र नाट्यकर्म (नाट्यमण्डप-निर्माण) में प्रशस्त हैं। उनमें भी पुष्य नक्षत्र का योग होने पर (जमीन की नापजोख के लिए) सफेद रंग का सूत्र (फीता) जमीन पर फैलाना चाहिए। विद्वानों को वह मापसूत्र कपास, बल्व, मुञ्ज या वल्कल से बनाना चाहिए और वह ऐसा होना चाहिए जिसमें छेद न हो। उस सूत्र के ठीक अर्द्धभाग में टूटने पर निश्चित रूप से स्वामी की मृत्यु होती है। उसका तीन भाग टूटने पर राष्ट्र में तनाव बढ़ता है। उसका चौथाई भाग विच्छिन्न होने पर 'प्रयोक्ता' का नाश होता है। (इतना ही नहीं, भूमि का नापजोख करते समय वह) हाथ से छूटने पर कोई न कोई नुकसान अवश्य होता है। इसलिए जमीन की नापजोख करते समय मापसूत्र को नित्य प्रयत्नपूर्वक मजबूती से पकड़ना चाहिए और नाट्यमण्डप की नापजोख करनी चाहिए। पश्चात् मुहूर्त्त के अनुकूल शुभ तिथि और शुभ करण देखकर ब्राह्मणों को सम्मानपूर्वक प्रसन्न कर उनसे पुण्याह-वाचनादि कराना चाहिए।।२७-३२।।

